ॐ धर्मानि

सर्वोपनिषत्सारसंग्रह

ईश्वरस्थ मुमुक्षुभवनजी

बनारस

दण्डस्वामी

धर्मानन्दतीर्थ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

३१६

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ

तत्सत्

अथ सर्वोपनिषत्सारसंग्रहः ।

तावद्गर्जन्ति शास्त्राणि जंबुका विपिने यथा ।
न गर्जति महाशक्तिर्यावद्वेदान्तकेसरी ॥
अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः ।
सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः ॥

सर्वमुमुक्षुहितार्थं

परमहंस श्रीगोविंदानंदस्वामिजी-

संग्रहितः प्रकाशितश्च ।

शाकः १८५१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

Publisher:-Gowindanandaswami C/o; Shri Siddha Litho Works, Kandewadi, Bombay No. 4.

Printer:—Ramchandra Yesu Shedge, Nirnaya-sagar Press, 26–28 Kolbhat Lane, Bombay.

मिलनेका पताः—

श्रीसिद्ध लिथो वर्क्स,

कांदावाडी, बाम्बे नं. ४

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विज्ञापनम् ।

अयि भो महाशयाः! अस्मिन्ग्रन्थे श्रीगुरुगीता–सर्वोपनिषत्सार-ब्रह्मसूत्रसांख्यसूत्रेभ्यस्तथा श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकराचार्यविर-चितात्सदाचारात्तथा क्वचिक्वचिदन्येभ्योऽपि ग्रंथेभ्यः सारभूतानां वाक्यानां महता परिश्रमेण संग्रहः कृतोस्ति । तेन मुमुक्षूणां तथा कीर्तनव्याख्यानप्र-वचनकर्तॄणां अतीव स्वादुपयोग इत्यस्ति मे बलवान् विश्वासः । अस्य पारा-यणेनापि महत्फलस्य लाभः स्यात् । यद्यपि मया माभूदत्राशुद्धमिति प्रयतितं तथापि 'गच्छतः स्खलनंक्वापि' इति न्यायेन कुत्रचिद्दृष्टिदोषेण कुत्रचिदक्षर-योजकप्रमादेनान्येन वा केनचित्कारणेन स्थितं चेदशुद्धं तत्क्षंतव्यं परमकृ-पालुभिर्विद्वद्भिरिति

विज्ञापयति

यतिर्गोविंदानंदः

एतत्प्रकाशने आर्थिकसहायकर्तृमहाशयानां नामानि.

श्रीमान् रामकरणजी.
श्रीमान् दयाशंकरजी.
श्रीमान् गीरराव वकील.
श्रीमान् वासुतकर महादेवराव.
श्रीमान् जयराम डिवटे.
श्रीमान् गुरुपादाप्पा रोकडे.
श्रीमान् वीरभद्रप्पा.
श्रीमान् चन्नाप्पा.

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विषयानुक्रमणिका ।

विषयः	पृष्ठम्
श्रीगुरुगीतासारः	१
कारणबोधकश्रुतयः	७
प्रवेशबोधकश्रुतयः	१०
अवस्थात्रयबोधकश्रुतयः ...	१४
सद्रूपबोधकश्रुतयः	१६
चिद्रूपबोधकश्रुतयः	१९
आनंदरूपबोधकश्रुतयः ...	२०
सच्चिदानंदरूपबोधकश्रुतयः ...	२१
ज्ञानसाधनबोधकश्रुतयः ...	३२
ज्ञेयरूपबोधकश्रुतयः	३६
आत्मबोधकश्रुतयः	४०
अभेदबोधकश्रुतयः	४७
जीवन्मुक्त्यनुभवबोधकश्रुतयः	५३
विदेहकैवल्यबोधकश्रुतयः ...	५९
प्रणवचिंतनबोधकश्रुतयः ...	
अष्टांगयोगबोधकश्रुतयः ...	
मंत्रयोगबोधकश्रुतयः	
राजयोगबोधकश्रुतयः... ...	
अंतर्यामीबोधकश्रुतयः ...	
कर्मबोधकश्रुतयः	
संन्यासबोधकश्रुतयः	
संग्रहश्रुतयः	
शिवस्वरूपबोधकश्रुतयः ...	
श्रीविष्णुस्वरूपबोधकश्रुतयः	१
विश्वरूपबोधकश्रुतयः	१
श्रीरामस्वरूपबोधकश्रुतयः ...	१
श्रीकृष्णस्वरूपबोधकश्रुतयः ...	१
भक्तियोगबोधकश्रुतयः ...	१

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ

श्रीगुरुगीतासारः ।

सत्यानन्दस्वरूपाय बोधैकसुखकारिणे ।
नमो वेदांतवेद्याय गुरवे बुद्धिसाक्षिणे ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुरेव परब्रह्म तस्मै श्रीगुरवे नमः ॥
अज्ञानतिमिरांधस्य ज्ञानांजनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥
स्थावरं जंगमं व्याप्तं यत्किंचित्सचराचरम् ।
त्वंपदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
अखंडमंडलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
चिन्मयव्यापितं सर्वं त्रैलोक्यं सचराचरम् ।
असितं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
चैतन्यं शाश्वतं शांतं व्योमातीतं निरंजनम् ।
नादबिंदुकलातीतं तस्मै श्रीगुरवे नमः ॥
यत्सत्त्वेन जगत्सत्यं यत्प्रकाशेन भात्यदः ।
यदानंदेन नंदंति तस्मै श्रीगुरवे नमः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः ।
न गुरोरधिकं ज्ञानं तस्मै श्रीगुरवे नमः ॥
ध्यानमूलं गुरोर्मूर्तिः पूजामूलं गुरोः पदम् ।
मंत्रमूलं गुरोर्वाक्यं मुक्तिमूलं गुरोः कृपा ॥
गुरुपादोदकं पेयं गुरोरुच्छिष्टभोजनम् ।
गुरुमूर्तेः सदा ध्यानं गुरोर्नाम्नः सदा जपः ॥
अज्ञानमूलहरणं जन्मकर्मनिवारणम् ।
ज्ञानवैराग्यसिद्ध्यर्थं गुरुपादोदकं पिबेत् ॥
काशीक्षेत्रं निवासश्च जाह्नवी चरणोदकम् ।
गुरुर्विश्वेश्वरः साक्षात् तारकं ब्रह्म निश्चयः ॥
आसनं शयनं वस्त्रं वाहनं भूषणादिकम् ।
साधकेन प्रदातव्यं गुरुसंतोषकारणम् ॥
शरीरमिन्द्रियं प्राणमर्थस्वजनबांधवान् ।
आत्मदारादिकं सर्वं सद्गुरुभ्यो निवेदयेत् ॥
गुरुरेको जगत्सर्वं ब्रह्मविष्णुशिवात्मकम् ।
गुरोः परतरं नास्ति तस्मात्संपूजयेद्गुरुम् ॥
कर्मणा मनसा वाचा सर्वदाराधयेद्गुरुम् ।
दीर्घदंडं नमस्कृत्य निर्लज्जो गुरुसन्निधौ ॥
सप्तसागरपर्यंतं तीर्थस्थानफलं यथा ।
गुरुपादोदकबिंदोः सहस्रांशेन तत्फलम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन ।
लब्ध्वा कुलगुरुं सम्यग्गुरुमेव समाश्रयेत् ॥
श्रीनाथचरणद्वंद्वं यस्यां दिशि विराजते ।
तस्यां दिशि नमस्कुर्याद्भक्त्या प्रतिदिनं प्रिये ॥
ब्रह्मानंदं परमसुखदं केवलं ज्ञानमूर्तिम्
द्वंद्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ॥
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतम्
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥
आनंदमानंदकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम् ।
योगीन्द्रमीड्यं भवरोगवैद्यं श्रीमद्गुरुं नित्यमहं नमामि ॥
हृदम्बुजे कर्णिकमध्यसंस्थं सिंहासने संस्थितदिव्यमूर्तिम् ।
ध्यायेद्गुरुं चंद्रकलाप्रकाशं सच्चित्सुखाभीष्टवरं दधानम् ॥
नित्यं शुद्धं निराभासं निराकारं निरञ्जनम् ।
नित्यबोधं चिदानन्दं गुरुं ब्रह्म नमाम्यहम् ॥
गुरुं त्वंकृत्य हुंकृत्य गुरुसान्निध्यभाषणः ।
अरण्ये निर्जले देशे संभवेद्ब्रह्मराक्षसः ॥
नित्यं ब्रह्म निराकारं निर्गुणं बोधयेत्परम् ।
भासयन्ब्रह्मभावं च दीपो दीपांतरं यथा ॥
वन्देहं सच्चिदानन्दं भावातीतं जगद्गुरुम् ।
नित्यं पूर्णं निराकारं निर्गुणं स्वात्मसंस्थितम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुरुश्शिवो गुरुर्देवो गुरुर्बंधुश्शरीरिणाम् ।
गुरुरात्मा गुरुर्जीवो गुरोरन्यन्न विद्यते ॥
ज्ञानहीनो गुरुस्त्याज्यो मिथ्यावादी विडंबकः ।
स्वविश्रांतिं न जानाति परशांतिं करोति किम् ॥
पाखंडिनः पापरता नास्तिका भेदबुद्धयः ।
स्त्रीलंपटा दुराचाराः कृतघ्ना बकवृत्तयः ॥
निरस्तसर्वसंदेह एकीकृत्य सुदर्शनम् ।
रहस्यं यो दर्शयति भजामि गुरुमीश्वरम् ॥
गुरवो बहवः संति शिष्यवित्तापहारकाः ।
तमेकं दुर्लभं मन्ये शिष्यहृत्तापहारकम् ॥
चातुर्यवान् विवेकी च अध्यात्मज्ञानवान् शुचिः ।
मानसं निर्मलं यस्य गुरुत्वं तस्य शोभते ॥
गुरवो निर्मलाः शांताः साधवो मितभाषिणः ।
कामक्रोधविनिर्मुक्ताः सदाचारजितेन्द्रियाः ॥
एकाक्षरप्रदातारं यो गुरुं नैव मन्यते ।
श्वानयोनिशतं गत्वा चाण्डालेष्वपि जायते ॥
गुरुत्यागाद्भवेन्मृत्युर्मंत्रत्यागाद्दरिद्रता ।
गुरुमंत्रपरित्यागी रौरवं नरकं व्रजेत् ॥
सप्तकोटिमहामंत्राश्चित्तविभ्रंशकारकाः ।
एक एव महामंत्रो गुरुरित्यक्षरद्वयम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

गुकारश्चांधकारस्तु रुकारस्तन्निरोधकृत् ।
अंधकारविनाशित्वाद्गुरुरित्यभिधीयते ॥
श्रद्धालुर्मुक्तिमार्गेषु वेदान्तज्ञानलिप्सया ।
उपायनकरो भूत्वा गुरुं ब्रह्मविदं व्रजेत् ॥
श्रवणं तु गुरोः पूर्वं मननं तदनन्तरम् ।
निदिध्यासनमित्येतत्पूर्णबोधस्य कारणम् ॥

यथा जात्यन्धस्य रूपज्ञानं न विद्यते तथा गुरूपदेशेन विना ल्पकोटिभिस्तत्त्वज्ञानं न विद्यते ।

यदा सद्गुरुकटाक्षो भवति तदा भगवत्कथाश्रवणध्यानादौ ाद्धा जायते ।

शान्तो दान्तोऽतिविरक्तः सुशुद्धो गुरुभक्तिस्तपोनिष्ठः शि- ो ब्रह्मनिष्ठं गुरुमासाद्य प्रदक्षिणपूर्वकं दण्डवत्प्रणम्य प्राञ्ज- ठर्भूत्वा विनयेनोपसङ्गम्य भगवन् गुरो मे परमतत्त्वरहस्यं ाविच्य वक्तव्यमिति ।

सर्वज्ञं सर्वगं शान्तं सर्वेषां हृदये स्थितम् ।
सुसंवेद्यं गुरुमतात्सुदुर्बोधमचेतसाम् ॥
दिव्यज्ञानोपदेष्टारं देशिकं परमेश्वरम् ।
पूजयेत्परया भक्त्या तस्य ज्ञानफलं भवेत् ॥
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कर्णधारं गुरुं प्राप्य तद्वाक्यं ध्रुववद्दृढम् ।
अभ्यासवासनाशक्त्या तरन्ति भवसागरम् ॥
दुर्लभो विषयत्यागो दुर्लभं तत्त्वदर्शनम् ।
दुर्लभा सहजावस्था सद्गुरोः करुणां विना ॥
सर्वपापप्रशमनं धर्मकामार्थमोक्षदम् ।
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितम् ॥
शुचिर्भूता ज्ञानवंतो गुरुगीतां जपंति ये ।
तेषां दर्शनसंस्पर्शात् पुनर्जन्म न विद्यते ॥

इति श्रीगुरुगीतासारः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ

अथ सर्वोपनिषत्सारसंग्रहः ।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥
ॐ शांतिः शांतिः शांतिः ।
ॐ कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥
मंगलाचरणं शिष्टाचारात्फलदर्शनात् ।
मंगलं भगवान्विष्णुर्मंगलं गरुडध्वजः ।
मंगलं पुंडरीकाक्षो मगलायतनं हरिः ॥

अथ कारणबोधकश्रुतयः ।

सर्गस्थितिप्रलयहेतुमचिंत्यशक्तिम्
विश्वेश्वरं विदितविश्वमनंतमूर्तिम् ।
निर्मुक्तबंधनमपारसुखांबुराशिम्
श्रीवल्लभं विमलबोधघनं नमामि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

विश्वेशं विश्वकर्तारं विश्वातीतं चिदात्मकम् ।
सर्वाधारं निराकारं तं वंदे परमेश्वरम् ॥
सच्चिदानंदकन्दाय जगदंकुरहेतवे ।
सदोदिताय पूर्णाय नमोऽनन्ताय विष्णवे ॥
ब्रह्मादिषु प्रलीनेषु नष्टे लोके चराचरे ।
एकस्तिष्ठति विश्वात्मा स मे विष्णुः प्रसीदतु ॥
सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम् ।
न तत्समश्चाभ्यधिकश्च दृश्यते ।
न तस्य कश्चित्पतिरस्ति लोके ।
तदैक्षत बहुस्यां प्रजायेयेति ।
ईक्षतेर्नाशब्दम् ।
आत्मा वा इदमेक एवाग्र आसीत् ।
सोऽकामयत बहुस्यां प्रजायेयेति ।
आत्मन आकाशः संभूतः आकाशाद्वायुः ।
वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी ॥
लोकवत्तु लीलाकैवल्यम् ।
एकाकी न रमते स द्वितीयमैच्छत् ।
आत्मानं द्विधाकरोदर्धेन स्त्री अर्धेन पुरुषो देवो भूत्वा ।
निष्कलङ्को निरञ्जनो निर्विकल्पो निराख्यातः ।
शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकं रूपं बहुधा यः करोति ।
नारायणात्प्राणो जायते मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥
जन्माद्यस्य यतः ।
यतो वा इमानि भूतानि जायन्ते ।
यतः प्रवृत्तिः प्रसृता पुराणी ।
यतः सर्वाणि भूतानि भवंत्यादियुगागमे ।
यस्मिंश्च प्रलयं यांति पुनरेव युगक्षये ॥
ऊर्णनाभवदुभयकारणत्वं श्रवणात् ।
यथोर्णनाभिः सृजते गृह्णते च ।
तथाक्षरात्संभवतीह विश्वम् ।
चिन्मयं प्रकृतिप्रेरकत्वात् ।
मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
देवात्मशक्तिं स्वगुणैर्निगूढाम् ।
ब्रह्मैव स्वशक्तिं प्रकृत्यभिधेयामाश्रित्य लोकान्सृष्ट्वा ।
सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् ।
सर्वभूतानि कौन्तेय प्रकृतिं यांति मामिकाम् ।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥
वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ।
सर्वाख्यारहितं यद्यत्सूक्ष्मात्सूक्ष्मतरं परम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मनोबुद्धीन्द्रियातीतमकलङ्कं जगत्पतिम् ॥
न च मां तानि कर्माणि निबध्नन्ति धनंजय ।
उदासीनवदासीनमसक्तं तेषु कर्मसु ॥
न दोषप्रसक्तिरसंगत्वात् ।
माया मेघो जगन्नीरं वर्षत्वेष यथा तथा ।
चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः ॥

अथ प्रवेशबोधकश्रुतयः ।

यो देवोऽग्नौ योऽप्सु यो विश्वं भुवनमाविवेश ।
य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो नमः ॥
अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव ।
एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च
तत्सृष्ट्वा तदेवानु प्राविशत् ।
निष्कलं निर्मलं शान्तं सर्वातीतं निरामयम् ।
तदेव जीवरूपेण पुण्यपापफलैर्वृतम् ॥
जीवत्वे प्रवेशाभिधानाच्च ।
परमात्माऽद्वयानन्दपूर्णः पूर्वं स्वमायया ।
स्वयमेव जगद्भूत्वा प्राविशज्जीवरूपतः ॥
अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि ।
स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स एष इह प्रविष्ट आनखाग्रेभ्यः ।
सूक्ष्माणामप्यहं जीवः ।
सर्वस्य चाहं हृदि सन्निविष्टः ।
अवस्थितेरिति काशकृत्स्नः ।
ईश्वरो जीवकलया प्रविष्टो भगवानिति ।
ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता ।
जाग्रदादिविमोक्षान्तः संसारो जीवकल्पितः ॥
स्वयंज्योतिरनाद्यन्तो निर्विकारः परात्परः ।
निर्गुणः सच्चिदानंदस्तदंशाज्जीवसंज्ञकः ॥
अंशो नानाव्यपदेशात् ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ।
ज्योतिश्चरणाभिधानात् ।
ममैवांशो जीवलोके जीवभूतः सनातनः ।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥
घटाकाशमठाकाशौ महाकाशे प्रतिष्ठितौ ।
एवं मयि चिदाकाशे जीवेशौ परिकल्पितौ ॥
अभेदेपि पृथक्त्वमुपाधिभेदात् ।
विशिष्टस्य जीवत्वमन्वयव्यतिरेकात् ।
अंतःकरणसंयुक्तं चैतन्यं परमात्मनः ।
जीव इत्युच्यते राजन् वेदवेदांगवेदिभिः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जीवभावश्चितेस्तद्योगात् ।
शुद्धमीश्वरचैतन्यं जीवचैतन्यमेव च ।
प्रमाता च प्रमाणं च प्रमेयं च फलं तथा ॥
नित्यः सर्वगतो ह्यात्मा कूटस्थो दोषवर्जितः ।
एकः सन्भिद्यते भ्रान्त्या मायया न स्वरूपतः ॥
कार्यकारणोपाधिभेदाज्जीवेश्वरभेदोऽपि दृश्यते ।
कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः ।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते ॥
मायायुतं ब्रह्म महेश्वरं बुधा
जीवं समेतं च वदंत्यविद्यया ।
नैवांतरं किंचिदुपाधिमंतरा
सम्यग्विचारेण तयोस्तु लभ्यते ॥
अत एवं चोपमा सूर्यकादिवत् ।
एक एव तु भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥
बिंबत्वं प्रतिबिंबत्वं यथा पूषणि कल्पितम् ।
जीवत्वमीश्वरत्वं च तथा ब्रह्मणि कल्पितम् ॥
जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः ।
आभास एव च ।
जीवेश्वरविभागेन द्विविधः पुरुषो मतः ।
ईश्वरो नित्यमुक्तत्वात्सदानंदस्वरूपकः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ईश्वरः सत्यसंकल्पः सर्वशक्तिधरः प्रभुः ।
सर्वस्यास्य स विश्वस्य कर्ता धर्ता न संशयः ॥
जीवेशावाभासेन करोति माया
चाविद्या च स्वयमेव भवति ।
बुद्धिप्रतिबिम्बितचैतन्यं जीवा इत्यपरे मन्यन्ते ।
कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिंबकः ।
प्राणानां धारणाज्जीवः संसारेण स युज्यते ॥
चैतन्यं यदधिष्ठानं लिंगदेहश्च यः पुनः ।
चिच्छाया लिंगदेहस्था तत्संघो जीव उच्यते ॥
अङ्गुष्ठमात्रो रवितुल्यरूपः संकल्पाहंकारसमन्वितो यः ।
बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रोऽप्यवरोऽपि दृष्टः
तदगुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ।
वालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ॥
यथा मृदि घटो नाम कनके कुण्डलाभिधा ।
शुक्तौ हि रजतख्यातिर्जीवशब्दस्तथा परे ॥
देहं धियं चित्प्रतिबिंबमेव
विसृज्य बुद्धौ निहितं गुहायाम् ।
द्रष्टारमात्मानमखण्डबोधं
सर्वप्रकाशं सदसद्विलक्षणम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि ।
सा सैव प्रक्रियेह स्यात् साध्वीत्याचार्यभाषितम् ॥

अथ अवस्थात्रयसाक्षिबोधकश्रुतयः ।

साक्षात्संबंधात्साक्षित्वम् ।

योऽयमात्मा स्वयंज्योतिः पञ्चकोशविलक्षणः ।
अवस्थात्रयसाक्षी सन्निर्विकारो निरञ्जनः ॥
न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते ।

सुषुप्त्यादि साक्षित्वम् ।

जाग्रत्स्वप्नः सुषुप्तं च गुणतो बुद्धिवृत्तयः ।
तासां विलक्षणो जीवः साक्षित्वेन विनिश्चितः ॥

जीवपृथक्त्वं साक्षित्वात् ।

बुद्धेर्जागरणं स्वप्नः सुषुप्तिरिति वृत्तयः ।
ता येनैवानुभूयन्ते सोऽध्यक्षः पुरुषः परः ॥

गुणपरिमाणादवस्थात्रयं जीवस्य ।

विश्वतैजसप्राज्ञसंज्ञा च तद्योगात् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ।
विश्वो हि स्थूलभुङ्नित्यं तैजसः प्रविविक्तभुक् ।
आनन्दभुक्तथा प्राज्ञः सर्वसाक्षीत्यतः परः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

भोक्ता सत्त्वगुणः शुद्धो भोगानां साधनं रजः ।
भोग्यं तमोगुणः प्राहुरात्मा चैषां प्रकाशकः ॥
त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणः साक्षी चिन्मात्रोऽहं सदाशिवः ॥
जाग्रत्स्वप्नसुषुप्त्यादि प्रपञ्चं यत्प्रकाशते ।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबंधैः प्रमुच्यते ॥
अत्रायं पुरुषः स्वयंज्योतिर्भवति ।
स्वप्नान्तं जागरितान्तं चोभौ येनानुपश्यति ।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति ॥
अशरीरं शरीरेषु महान्तं विभुमीश्वरम् ।
आनन्दमक्षरं साक्षान्मत्वा धीरो न शोचति ॥
अवस्थात्रितयातीतं तुरीयं ब्रह्मसंज्ञितम् ।
ब्रह्मविष्ण्वादिभिः सेव्यं सर्वेषां जनकं परम् ॥
अवस्थात्रयभावाभावसाक्षी स्वयं भावरहितं नैरन्तर्यम् ।
चैतन्यं यदा यदा तुरीयं चैतन्यमित्युच्यते ॥
जागरिते ब्रह्म स्वप्ने विष्णुः
सुषुप्तौ रुद्रस्तुरीयमक्षरं चिन्मयम् ।
शिवमद्वैतं चतुर्थं मन्यन्ते ।
यदि जागरतः प्रभृति त्रितयं परिकल्पितमात्मनि मूढधिया ।
अभिधानमिदं तदपेक्ष्य भवेत् परमात्मपदस्य तुरीयमिति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति-
होवाचैतदमृतमभयमेतद्ब्रह्मेति ।
सत्त्वाज्जागरणं विद्याद्रजसा स्वप्नमादिशेत् ।
प्रस्वापं तमसा जन्तोस्तुरीयं त्रिषु सन्ततम् ॥
नेत्रस्थं जागरितं विद्यात्कण्ठे स्वप्नं समादिशेत् ।
सुषुप्तं हृदयस्थं तु तुरीयं मूर्ध्नि संस्थितम् ॥
तुर्यातीतं परं ब्रह्म ब्रह्मरन्ध्रे तु लक्षयेत् ।
तुर्यातीता तु यावस्था परा निर्वाणरूपिणी ।
सप्तमी सा परा प्रौढा विषयो नैव जीवताम् ॥
एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु ।
स्थानत्रयाद्व्यतीतस्य पुनर्जन्म न विद्यते ॥
त्रिषु धामसु यत्तुल्यं सामान्यं वेत्ति निश्चितः ।
सम्पूज्यः सर्वभूतानां वन्द्यश्चैष महामुनिः ॥
ज्ञानमेकं सदा भाति सर्वावस्थासु निर्मलम् ।
मंदभाग्या न जानन्ति स्वरूपं केवलं बृहत् ॥

अथ सद्रूपबोधकश्रुतयः ।

सन्मूलमन्विच्छ सन्मूलाः सोम्येमाः
सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ।
आकाशवत्सर्वगतश्च नित्यः ।
असम्भवस्तु सतोऽनुपपत्तेः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥
घटावभासको भानुर्घटनाशे न नश्यति ।
देहावभासकः साक्षी देहनाशे न नश्यति ॥
स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यतेऽशीर्यो
न हि शीर्यतेऽसङ्गो न हि सज्यतेऽसितो न व्यथते ।
स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्म ।
कदाचिदात्मा न मृतो न जायते
न क्षीयते नापि विवर्धते नवः ।
निरस्तसर्वातिशयः सुखात्मकः
स्वयंप्रभः सर्वगतोऽयमद्वयः ॥
न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित् ।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे ॥
जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते ।
नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लेदयंत्यापो न शोषयति मारुतः ॥
असन्नेव स भवति असद्ब्रह्मेति वेद चेत् ।
अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति ॥
स्थित्युद्भवप्रलयहेतुरहेतुरस्य
यत्स्वप्नजागरसुषुप्तिषु सद्बहिश्च ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देहेन्द्रियासुहृदयानि चरन्ति येन
संजीवितानि तदवेहि परं नरेन्द्र ॥
क्षरं प्रधानममृताक्षरं हरः ।
क्षरः सर्वाणि भूतानि सूत्रात्माऽक्षर उच्यते ।
अक्षरं परमं ब्रह्म निर्विशेषं निरञ्जनम् ॥
अक्षरं ब्रह्म परमम् ।
यदक्षरं वेदविदो वदन्ति ।
अक्षरमम्बरान्तधृतेः ।

स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्त्यस्थूल
ण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवाय्वनाकाशमसङ्
रसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखमम
मनन्तरमबाह्यं न तदश्नाति किंचन न तदश्नाति कश्चन ।

अथ य एतदक्षरं गार्गि विदित्वास्माल्लोकात्प्रैति स ब्राह्म
यः कश्चिदात्मानमद्वितीयं जातिगुणक्रियाहीनं षड्भिर्मिषड्भ
त्यादिसर्वदोषरहितं सत्यज्ञानानन्दानन्तस्वरूपं स्वयं निर्वि
ल्पमशेषकल्पाधारमशेषभूतान्तर्यामित्वेन वर्तमानमन्तर्बहि
काशवदनुस्यूतमखण्डानन्दस्वभावमप्रमेयमनुभवैकवेद्यमपरो
तया भासमानं करतलामलकवत्साक्षादपरोक्षीकृत्य कृतार्थ
कामरागादिदोषरहितः शमदमादिसंपन्नो भावमात्सर्यतृष्णा
मोहादिरहितो दम्भाहंकारादिभिरसंस्पृष्टचेता वर्तत एवस

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षणो यः स एव ब्राह्मण इति श्रुतिस्मृतिपुराणेतिहासानाम-
भेप्रायः ।

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ॥

अथ चिद्रूपबोधकश्रुतयः ।

निर्गुणत्वान्न चिद्धर्मा ।
जडव्यावृत्तो जडं प्रकाशयति चिद्रूपः ।
ज्योतिर्दर्शनात् ।
हृद्यन्तर्ज्योतिः पुरुषः ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्णम् ।
परं ज्योतिस्तमस उपरि विभाति ।
ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य धिष्ठितम् ॥
हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम् ।
तच्छुभ्रं ज्योतिषां ज्योतिस्तद्यदात्मविदो विदुः ॥

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनु भाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्योतीरूपेण तन्मयत्वात् ।
यदादित्यगतं तेजो जगद्भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥
एष स्वयंज्योतिरजोऽप्रमेयो महानुभूतिः सकलानुभूतिः ।
एकोऽद्वितीयो वचसां विरामे येनेषिता वागसवश्चरन्ति ।

अथ आनन्दरूपबोधकश्रुतयः ।

परप्रेमास्पदत्वाच्चानन्दमयम् ।
विज्ञानमानन्दं ब्रह्म ।
आनन्दमयोऽभ्यासात् ।
आनन्दो ब्रह्मेति व्यजानात् ।
आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते ।
आनन्देन जातानि जीवन्ति ।
आनन्दं प्रयन्त्यभिसंविशन्ति ।
अखण्डानन्दरूपस्य तस्यानन्दलवाश्रिताः ।
ब्रह्माऽद्यास्तारतम्येन भवन्त्यानन्दिनोऽखिलाः ॥
एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति ।
भूमा सम्प्रसादादध्युपदेशात् ।
यो वै भूमा तत्सुखं नाल्पे सुखमस्ति ।
यदेव कं तदेव खं यदेव खं तदेव कम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥
सात्त्विकं सुखमात्मोत्थं विषयोत्थं तु राजसम् ।
तामसं मोहदैन्योत्थं निर्गुणं मदपाश्रयम् ॥
वित्तात्पुत्रः प्रियः पुत्रात्पिंडः पिंडात्तथेंद्रियम् ।
इन्द्रियाच्च प्रियः प्राणः प्राणादात्मा प्रियः परः ॥
न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति ।
आत्मनस्तु कामाय सर्वं प्रियं भवति ॥
आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति ।

अथ सच्चिदानन्दस्वरूपबोधकश्रुतयः ।

चित्सदानन्दरूपाय सर्वधीवृत्तिसाक्षिणे ।
नमो वेदान्तवेद्याय ब्रह्मणेऽनन्तरूपिणे ॥

आनन्दादयः प्रधानस्य ।
तत्तु समन्वयात् ॥

परं ब्रह्म परं सत्यं सच्चिदानन्दलक्षणम् ।
अप्रमेयमनिर्देश्यमवाङ्मनसगोचरम् ॥
सर्वाधिष्ठानमद्वन्द्वं परं ब्रह्म सनातनम् ।
सच्चिदानन्दरूपं तदवाङ्मनसगोचरम् ॥
सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहायाम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मपुच्छं प्रतिष्ठा ।

यदिदं ब्रह्मपुच्छाख्यं सत्यज्ञानाद्वयात्मकम् ।
सारमेव रसं लब्ध्वा साक्षाद्देही सनातनम् ॥
सच्चिदानन्दमात्मानमद्वितीयं ब्रह्म भावयेत् ।
आत्मानं सच्चिदानन्दं ब्रह्म भावयेत् ॥
सर्वं सच्चिन्मयं विद्धि सर्वं सच्चिन्मयं ततम् ।
सच्चिदानन्दमद्वैतं सच्चिदानन्दमद्वयम् ॥
अपूर्वमपरं ब्रह्म स्वात्मानं सत्यमद्वयम् ।
प्रज्ञानघनमानन्दं यः पश्यति स पश्यति ॥
तद्ब्रह्मानन्दमद्वन्द्वं निर्गुणं सत्यचिद्घनम् ।
विदित्वा स्वात्मनो रूपं न बिभेति कदाचन ॥
सच्चिदानन्दमात्रं हि सच्चिदानन्दमन्यकम् ।
सच्चिदानन्दरूपोऽहं सच्चिदानन्दमेव खम् ।
सर्वं सन्मात्ररूपत्वात्सच्चिदानन्दमात्रकम् ।
तदेवाहं तदेवाहं ब्रह्मैवाहं सनातनम् ॥
नित्यं शुद्धविमुक्तैकमखण्डानन्दमद्वयम् ।
सत्यं ज्ञानमनन्तं यत्परं ब्रह्माहमेव तत् ॥
निष्कलं निर्मलं साक्षात्सच्चिदानन्दरूपकम् ।
ज्ञातं येन निजं रूपं कैवल्यं परमं पदम् ॥
सर्वगं सच्चिदानन्दं ज्ञानचक्षुर्निरीक्षते ।
अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उलूकस्य यथा भानोरन्धकारः प्रतीयते ।
स्वप्रकाशे परानन्दे तमो मूढस्य जायते ॥
यथा जात्यन्धस्य रूपज्ञानं न विद्यते
तथा गुरूपदेशेन विना कल्पकोटिभिस्तत्त्वज्ञानं न विद्यते ।
दुर्लभो विषयत्यागो दुर्लभं तत्त्वदर्शनम् ।
दुर्लभा सहजावस्था सद्गुरोः करुणां विना ॥
सर्वज्ञं सर्वगं शान्तं सर्वेषां हृदये स्थितम् ।
सुसंवेद्यं गुरुमतात्सुदुर्बोधमचेतसाम् ॥
न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैस्तपसा कर्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥
बृहच्च तद्दिव्यमचिन्त्यरूपं सूक्ष्माच्च तत्सूक्ष्मतरं विभाति ।
दूरात्सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम् ॥
तिलेषु तैलं दधनीव सर्पिरापः स्रोतस्स्वरणीषु चाग्निः ।
एवमात्माऽत्मनि गृह्यतेऽसौ सत्येनैनं तपसा योऽनु पश्यति ॥
अन्तरा भूतग्रामवत्स्वात्मनः ।
एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा ।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च ॥
एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥
मनोमात्रसाध्यत्वान्न दुष्करम् । मनसो ये मनो विदुः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन ।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ॥
घृतमिव पयसि निगूढं भूते भूते च वसति विज्ञानम् ।
सततं मन्थयितव्यं मनसा मन्थानभूतेन ॥
तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ॥

ॐ शास्त्रयोनित्वात् ।

तं त्वौपनिषदं पुरुषं पृच्छामि ।

अथ परा यया तदक्षरमधिगम्यते ।

द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत् ।
शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥

अणोरणीयान्महतो महीयानात्मास्य जन्तोर्निहितो गुहायाम्
तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् ।

अणुरात्मा चेतसा वेदितव्यः ।

वालाग्रमात्रं हृदयस्य मध्ये विश्वं देवं जातरूपं वरेण्यम् ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम् ॥
एको वशी सर्वभूतान्तरात्मैकं रूपं बहुधा यः करोति ।
तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्
यत्सत्यं विज्ञानमानन्दं निष्क्रियं निरञ्जनं सर्वगतं सुसूक्ष्मम्
सर्वतोमुखमनिर्देश्यममृतमस्ति तदिदं निष्कलं रूपम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri .

सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये विश्वस्य स्रष्टारमनेकरूपम् ।
विश्वस्यैकं परिवेष्टितारं ज्ञात्वा शिवं शान्तिमत्यन्तमेति ॥
स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूतानां राजा।
तद्यथा रथनाभौ च रथनेमौ चाराः सर्वे समर्पिताः ।
एवमेवास्मिन्नात्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः
सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ॥

आधारः सर्वभूतानामनाधारमनामयम् ।
अप्रमाणमनिर्देश्यमप्रमेयमतीन्द्रियम् ॥
स एव जगतः साक्षी सर्वात्मा विमलाकृतिः ।
प्रतिष्ठा सर्वभूतानां प्रज्ञानघनलक्षणः ॥
निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितम् ।
अप्रमेयमनाद्यन्तं ज्ञात्वा च परमं शिवम् ॥
अधिष्ठानं समस्तस्य जगतः सत्यचिद्घनम् ।
अद्वैतं परमानन्दं शिवं याति तु केवलम् ॥
अन्तःपूर्णो वहिःपूर्णः पूर्णकुम्भ इवार्णवे ।
अन्तःशून्यो वहिःशून्यः शून्यकुम्भ इवाम्बरे ॥
एकं सर्वगतं व्योम वहिरन्तर्यथा घटे ।
नित्यं निरन्तरं ब्रह्म सर्वभूतगणे तथा ॥

ॐ ईशावास्यमिदं सर्वम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥
सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः ।
सर्वव्यापी स भगवान् तस्मात्सर्वगतः शिवः ॥

नान्योऽतोऽस्ति द्रष्टा ।

चिज्जडानां तु यो द्रष्टा सोऽच्युतो ज्ञानविग्रहः ।
स एव हि महादेवः स एव हि महाहरिः ॥
स एव ज्योतिषां ज्योतिः स एव परमेश्वरः ।
स एव हि परंब्रह्म तद्ब्रह्माहं न संशयः ॥
तुषेण बद्धो व्रीहिः स्यात्तुषाभावेन तण्डुलः ।
पाशबद्धस्तथा जीवः पाशमुक्तः सदाशिवः ॥
जीवः शिवः शिवो जीवः स जीवः केवलः शिवः ।

सर्वत्र तन्मयत्वावलोकनम् ।

ब्रह्माद्यं स्थावरान्तं च पश्यन्ति ज्ञानचक्षुषः ।
तमेकमेव पश्यन्ति परिशुभ्रं विभुं द्विजाः ॥
नित्यं विभुं सर्वगतं सुसूक्ष्मं च तदव्ययम् ।
तद्भूतयोनिं पश्यन्ति धीरा आत्मानमात्मनि ॥
यः शरीरेन्द्रियादिभ्यो विहीनं सर्वसाक्षिणम् ।
परमार्थैकविज्ञानं सुखात्मानं स्वयंप्रभुम् ॥
एवं सर्वाणि भूतानि मणौ सूत्र इवात्मनि ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघनः ।
एवमेवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनः ॥
तदेतद्ब्रह्माऽपूर्वमनपरमनन्तरमबाह्यम् ।
अयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥
ज्योतिषामपि तज्ज्योतिस्तमःपारे प्रतिष्ठितम् ।
भावाभावविनिर्मुक्तं भावनामात्रगोचरम् ॥
अविद्यातिमिरातीतं सर्वाभासविवर्जितम् ।
आनन्दममलं शुद्धं मनोवाचामगोचरम् ॥
निष्कलं निर्गुणं शान्तं निर्विकारं निराश्रयम् ।
निर्लेपकं निरापायं कूटस्थमचलं ध्रुवम् ॥
निष्कले निष्क्रिये शान्ते निरवद्ये निरञ्जने ।
अद्वितीये परे तत्त्वे व्योमवत्कल्पना कुतः ॥
तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम् ।
तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवम् ॥
ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥
एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम् ।
समस्तसाक्षिं सदसद्विहीनं प्रयाति शुद्धं परमात्मरूपम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय
महाजनो येन गतः स पन्थाः ।
अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम्
येनेदं सर्वं विजानाति तं केन विजानीयात् ।
यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चि
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् ॥
वृक्षं तु सकलं विद्याच्छाया तस्यैव निष्कला ।
सकले निष्कले भावे सर्वत्रात्मा व्यवस्थितः ॥
तिलानां तु यथा तैलं पुष्पे गन्ध इवाश्रितः ।
पुरुषस्य शरीरे तु स बाह्याभ्यन्तरे स्थितः ॥
विशेषणभेदव्यपदेशाभ्यां च नेतरौ ।
दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः ॥
विज्ञानमात्रं विज्ञानविदां यदमलात्मकम् ।
पुरुषः सांख्यदृष्टीनामीश्वरो योगवादिनाम् ॥
योगा यदीश्वरं प्राहुः सांख्या यत्पुरुषं परम् ।
तदेव पूर्णचैतन्यं वेदान्ते ब्रह्म गीयते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥
शुद्धं सूक्ष्मं निराकारं निर्विकारं निरञ्जनम् ।
अनन्तमपरिच्छेद्यमनूपममनामयम् ॥
निरामयं निराभासं निरवद्यं निरञ्जनम् ।
नित्यानन्दं निराकारमद्वैतं तमसः परम् ॥
अस्थूलमनणु ह्रस्वमदीर्घमजमव्ययम् ।
अशब्दमस्पर्शरूपमचक्षुःश्रोत्रनामकम् ॥
सद्घनं चिद्घनं नित्यमानन्दघनमव्ययम् ।
प्रत्यगेकरसं पूर्णमनन्तं सर्वतोमुखम् ॥
सर्वतःपाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतःश्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥
नैव स्त्री न पुमानेष न चैवायं नपुंसकः ।
यद्यच्छरीरमादत्ते तेन तेन स युज्यते ॥
समस्तसाक्षी सर्वात्मा सर्वभूतगुहाशयः ।
सर्वेन्द्रियगुणाभासः सर्वेन्द्रियविवर्जितः ॥
अहंकारः प्रभुः सभ्या विषया नर्तकी मतिः ।
तालादिधारीण्यक्षाणि दीपः साक्ष्यवभासकः ॥
उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शरीरादिव्यतिरिक्तः पुमान् ।
महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ॥
त्रयोविंशतिरेतानि तत्त्वानि प्रकृतानि तु ।
चतुर्विंशतिरव्यक्तं प्रधानं पुरुषः परः ॥
इंद्रियाणि पराण्याहुरिंद्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥
महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः ॥
न तत्परोऽनवस्थाप्रसंगात् ।
देहेन्द्रियमनःप्राणसाक्षी चेतःप्रसादकः ।
सूक्ष्मः सर्वगतो देही ज्ञानदर्पणगोचरः ॥
अव्यक्तात्तु परः पुरुषो व्यापकोऽलिङ्ग एव च ।
यं ज्ञात्वा मुच्यते जन्तुरमृतत्वं च गच्छति ॥
पुरमेकादशद्वारमजस्यावक्रचेतसः ।
अनुष्ठाय न शोचति विमुक्तश्च विमुच्यते ॥
ज्ञात्वा देवं मुच्यते सर्वपाशैः ।
यस्यामतं तस्य मतं मतं यस्य न वेद सः ।
अविज्ञातं विजानतां विज्ञातमविजानताम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यस्मिन्विज्ञाते सर्वमिदं विज्ञातं भवति ।
वेदाहमेतमजरं पुराणं सर्वात्मानं सर्वगतं विभुत्वात् ।
अचिन्त्यमव्यक्तमनन्तमव्ययं वेदात्मकं ब्रह्म निजं विजानते ।
यत्पूर्णानन्दैकबोधस्तद्ब्रह्मैवाहमस्मीति कृतकृत्यो भवति ।
यत्साक्षादपरोक्षाद्ब्रह्म ।
ज्ञानस्वरूपमेवादौ ज्ञानं ज्ञेयैकसाधनम् ।
ज्ञातं येन निजं रूपं कैवल्यं परमं पदम् ॥
ज्ञानादेव तु कैवल्यम् ।
कुरुते गंगासागरगमनं व्रतपरिपालनमथवा दानम् ।
ज्ञानविहीने सर्वमनेन मुक्तिर्न भवति जन्मशतेन ॥
आहारनिद्राभयमैथुनानि समानि चैतानि नृणां पशूनाम् ।
ज्ञानं नराणामधिको विशेषो ज्ञानेन हीनाः पशुभिः समानाः ॥
यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिंल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति ।
यदा चर्मवदाकाशं वेष्टयिष्यति मानवः ।
तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥
श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यं न विद्युः ।
आश्चर्यो वक्ता कुशलोऽस्य लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः ॥
आश्चर्यवत्पश्यति कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न श्रवणमात्रात्तत्सिद्धिरनादिवासनाया बलवत्त्वात् ।

नोपदेशश्रवणेऽपि कृतकृत्यता परामर्शादृते विरोचनवत्

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्
नायमात्मा बलहीनेन लभ्यो न च प्रमादात्तपसो वाप्यलिङ्गात्
एतैरुपायैर्यतते यस्तु विद्वांस्तस्यैष आत्मा विशते ब्रह्मधाम ।

अथ ज्ञानसाधनबोधकश्रुतयः ।

बन्धो विपर्ययात् ।

न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः ।

अनादिमायया सुप्तो यदा जीवः प्रबुद्ध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुद्ध्यते तदा ॥

शब्दशक्तेरचिन्त्यत्वाच्छब्दादेवापरोक्षधीः ।
सुषुप्तः पुरुषो यद्वच्छब्देनैवानुबुद्ध्यते ॥

माता नास्ति पिता नास्ति नास्ति बंधुसहोदरम् ।
अर्थो नास्ति गृहं नास्ति तस्माज्जागृहि जागृहि ॥

कामक्रोधौ लोभमोहौ देहे तिष्ठंति तस्कराः ।
हरन्ति ज्ञानरत्नानि तस्माज्जागृहि जागृहि ॥

उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत ।
क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत्कवयो वदन्ति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न कालनियमो वामदेववत् ।
आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः ।
आहारशुद्धौ चित्तस्य विशुद्धिर्भवति स्वतः ।
चित्तशुद्धौ क्रमाज्ज्ञानं ब्रुवन्ति ग्रन्थयः स्फुटम् ॥
सत्त्वात्संजायते ज्ञानम् ।
तद्यथेह कर्मचितो लोकः क्षीयते ।
एवमेवामुत्र पुण्यचितो लोकः क्षीयते ॥
दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ।
प्रतिबंधो वर्तमानो विषयासक्तिलक्षणः ।
प्रज्ञामांद्यं कुतर्कश्च विपर्ययदुराग्रहः ॥
स्त्रियं त्यक्त्वा जगत्त्यक्तं जगत्त्यक्त्वा सुखी भवेत् ।
न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ॥
मुक्तिमिच्छसि चेत्तात विषयान्विषवत्त्यज ।
क्षमार्जवदयातोषसत्यं पीयूषवद्भज ॥
सत्येन लभ्यस्तपसा ह्येष आत्मा
सम्यग्ज्ञानेन ब्रह्मचर्येण नित्यम् ।
अंतःशरीरे ज्योतिर्मयो हि शुभ्रो
यं पश्यन्ति यतयः क्षीणदोषाः ॥
आत्मलाभान्न परं विद्यते ।
लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥
श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेंद्रियः ।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ॥
स्वशरीरे स्वयं ज्योतिःस्वरूपं सर्वसाक्षिणम् ।
क्षीणदोषाः प्रपश्यन्ति नेतरे मायया वृताः ॥

यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नि
विभुं सर्वगतं सुसूक्ष्मं तदव्ययं तद्भूतयोनिं परिपश्यन्ति धीर
पराञ्चि खानि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यन्ति नान्तरात्
कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ॥

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥
मातृवत्परदाराणि परद्रव्याणि लोष्ठवत् ।
आत्मवत्सर्वभूतानि यः पश्यति स पश्यति ॥
शान्तो दान्त उपरतस्तितिक्षुः समाहितो
भूत्वात्मन्येवात्मानं पश्येत् ।
परदर्शनं च पुण्योत्कर्षात् ।

तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति
यज्ञेन दानेन तपसाऽनाशकेनैतमेव विदित्वा मुनिर्भवति ।
सत्कर्मपरिपाकतो बहूनां जन्मनामन्ते नृणां मोक्षेच्छा जाय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ अथातो ब्रह्मजिज्ञासा ।
आत्मापहतपाप्मा विजरोविमृत्युर्विशोकोऽविजिघत्सोऽपिपासः
त्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः ॥
यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति ।
यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेति ॥
अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म
दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यम् ।
तद्वाव विजिज्ञासितव्यमिति ॥
यस्य वैतत् कर्म स वै वेदितव्यः ।
यस्मिन्विज्ञाते सर्वमिदं विज्ञातं भवतीति ।
येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम् ।
एकांशात्सर्वज्ञानं मृत्पिण्डवत् ।
यावद्विकारं तु विभागो लोकवत् ।
था सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातम् ।
याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ॥
तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्
समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम् ॥
आचार्यवान्पुरुषो वेद ।
श्रवणं तु गुरोः पूर्वं मननं तदनन्तरम् ।
निदिध्यासनमित्येतत्पूर्णबोधस्य कारणम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

धनवृद्धा वयोवृद्धा विद्यावृद्धास्तथैव च ।
ते सर्वे ज्ञानवृद्धस्य किंकराः शिष्यकिंकराः ॥

आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्

आवृत्तिरसकृदुपदेशात् ।

दार्ढ्यार्थमुत्तरेषाम् ।

अहं ब्रह्मेति वाक्यार्थबोधो यावद्दृढीभवेत् ।
शमादिसहितस्तावदभ्यसेच्छ्रवणादिकम् ॥
श्रद्धालुर्मुक्तिमार्गेषु वेदान्तज्ञानलिप्सया ।
उपायनकरो भूत्वा गुरुं ब्रह्मविदं व्रजेत् ॥
भक्त्या विना ब्रह्मज्ञानं कदापि न जायते ।
यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

शान्तो दान्तोऽतिविरक्तः सुशुद्धो गुरुभक्तस्तपोनिष्ठः
शिष्यो ब्रह्मनिष्ठं गुरुमासाद्य प्रदक्षिणपूर्वकं
दण्डवत्प्रणम्य प्राञ्जलिर्भूत्वा विनयेनोपसङ्गम्य
भगवन् गुरो मे परमतत्त्वरहस्यं विविच्य वक्तव्यमिति

अथ ज्ञेयबोधकश्रुतयः ।

राजपुत्रवत्तत्त्वोपदेशात् ।

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अद्वैताखण्डपरिपूर्णनिरतिशयपरमानन्द-
शुद्धबुद्धमुक्तसत्यात्मकं ब्रह्म ।
अचिन्त्यरूपमव्यक्तमनन्तममृतं शिवम् ।
आदिमध्यान्तरहितं प्रशान्तं ब्रह्म कारणम् ॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।
तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥
स्वतश्चिदंतर्यामी तु मायावी सूक्ष्मसृष्टितः ।
सूत्रात्मा स्थूलसृष्टयैव विराडित्युच्यते परः ॥
यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥
यस्मिन्सर्वमिदं प्रोतं ब्रह्म स्थावरजंगमम् ।
तस्मिन्नेव लयं यान्ति स्रवन्त्यः सागरे यथा ॥
द्रष्टृदर्शनदृश्याभ्यां विरामो यत्र वा भवेत् ।
दृष्टिस्तत्रैव कर्तव्या न नासाग्रावलोकिनी ॥
दृष्टिं ज्ञानमयीं कृत्वा पश्येद्ब्रह्ममयं जगत् ।
यत्र यत्र मनो याति ब्रह्मणस्तत्र दर्शनात् ॥
अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ।
तदनन्यत्वमारम्भणशब्दादिभ्यः ।
सुवर्णाज्जायमानस्य सुवर्णत्वं च शाश्वतम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्मणो जायमानस्य ब्रह्मत्वं च तथा भवेत् ॥
किं पृथग्भासते स्वर्णात्कटकांगदनूपुरम् ।
यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवत् ॥
सर्वं ब्रह्मैव सततं सर्वं ब्रह्मैव केवलम् ।
सर्वं ब्रह्मैव सततं सर्वं ब्रह्मैव चेतनम् ॥

ऐतदात्म्यमिदं सर्वम् ।

वासुदेवः सर्वमिति ।

सर्वं खल्विदं ब्रह्म नेह नानास्ति किंचन ।
विश्वं स्फुरति यत्रेदं तरंगा इव सागरे ।
सोऽहमस्मीति विज्ञाय किं दीन इव धावसि ॥
यथैव व्योम्नि नीलत्वं यथा नीरं मरुस्थले ।
पुरुषत्वं यथा स्थाणौ तद्वद्विश्वं चिदात्मनि ॥
समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥
गवामनेकवर्णानां क्षीरस्याप्येकवर्णता ।
क्षीरवत्पश्यते ज्ञानं लिङ्गिनस्तु गवां यथा ॥
समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥

तन्निष्ठस्य मोक्षोपदेशात् ।

योगिनामात्मनिष्ठानां माया स्वात्मनि कल्पिता ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

साक्षिरूपतया भाति ब्रह्मज्ञानेन बाधिता ॥
जगच्चित्रं स्वचैतन्यपटे चित्रमिवार्पितम् ।
मायया तदुपेक्ष्यैव चैतन्यं परिशेष्यताम् ॥
निवृत्तौ सर्वदुःखानामीशानः प्रभुरव्ययः ।
अद्वैतः सर्वभावानां देवस्तुर्यो विभुः स्मृतः ॥
यदा पश्यति चात्मानं केवलं परमार्थतः ।
मायामात्रं जगत्कृत्स्नं तदा भवति निर्वृतिः ॥

न सतो बाधदर्शनात् ।

प्रपंचो यदि विद्येत निवर्तेत न संशयः ।
मायामात्रमिदं द्वैतमद्वैतं परमार्थतः ॥
सत्यं ज्ञानमनन्तं सदानन्दं ब्रह्म केवलम् ।
सर्वधर्मविहीनं च मनोवाचामगोचरम् ॥
यस्मिन्विलीयते शब्दस्तत्परं ब्रह्म गीयते ।
धियं हि लीयते ब्रह्म सोऽमृतत्वाय कल्पते ॥
यन्मायारहितं शुद्धमक्षरं चाव्ययं परम् ।
सत्यं ज्ञानसुखानन्तं तदहं ब्रह्म निर्भयम् ॥

अभयं वै जनक प्राप्तोऽसीति ।

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥
इदं ज्ञानमिदं ज्ञेयं तत्सर्वं ज्ञातुमिच्छति ।
अपि वर्षसहस्रायुः शास्त्रान्तं नाधिगच्छति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ आत्मबोधकश्रुतयः ।

यत्तद्व्यक्तस्थमव्यक्तं विचिन्वन्ति महर्षयः ।
क्षेत्रे क्षेत्रज्ञमासीनं तस्मै क्षेत्रात्मने नमः ॥
आत्मा नित्योऽव्ययः शुद्ध एक क्षेत्रज्ञ आश्रयः ।
अविक्रियः स्वदृग्हेतुर्व्यापकोऽसंग्यनावृतः ॥
शोकहर्षभयक्रोधलोभमोहस्पृहादयः ।
अहंकारस्य दृश्यन्ते जन्म मृत्युश्च नात्मनः ॥
जलस्य चलनादेव चञ्चलत्वं यथा रवेः ।
तथाहंकारसंबंधादेव संसार आत्मनः ॥
यथा जले चन्द्रमसः कंपादिस्तत्कृतो गुणः ।
दृश्यते सन्नपि द्रष्टुरात्मनो नात्मनो गुणः ॥
पुष्पे गंधं तिले तैलं काष्ठे वह्निं पयो घृतम् ।
इक्षौ गुडं तथा देहे पश्यात्मानं विवेकतः ॥
ज्ञात्वा स्वं प्रत्यगात्मानं बुद्धितद्वृत्तिसाक्षिणम् ।
सोऽहमित्येव तद्वृत्त्या स्वान्यत्रात्ममतिं त्यजेत् ॥
आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।
किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत् ।
तरति शोकमात्मवित् ।
सर्वव्यापिनमात्मानं क्षीरे सर्पिरिवार्पितम् ।
सर्वसाक्षिणमात्मानं यो वेद न स बध्यते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
सर्वसाक्षिणमात्मानं वर्णाश्रमविवर्जितम् ।
ब्रह्मरूपतया पश्यन्ब्रह्मैव भवति स्वयम् ॥
यस्य वर्णाश्रमाचारो गलितः स्वात्मदर्शनात् ।
सवर्णानाश्रमान्सर्वानतीत्य स्वात्मनि स्थितः ॥
देहाभिमाने गलिते विज्ञाते परमात्मनि ।
यत्र यत्र मनो याति तत्र तत्र परामृतम् ॥
यस्तु सर्वाणि भूतान्यात्मन्येवानु पश्यति ।
सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥
सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
संपश्यन्ब्रह्म परमं याति नान्येन हेतुना ॥
यदा सर्वाणि भूतानि स्वात्मन्येव हि पश्यति ।
सर्वभूतेषु चात्मानं ब्रह्म संपद्यते तदा ॥
आत्मनश्च परस्यापि यः करोत्यंतरोदरम् ।
तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम् ॥
द्युभ्वाद्यायतनं स्वशब्दात् ।
यस्मिन्द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः ।
तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ ॥
सत्यचिद्घनमखण्डमद्वयं सर्वदृश्यरहितं निरामयम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यत्पदं विमलमद्वयं शिवं तत्सदाहमिति मौनमाश्रय
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायाद्बहून् शब्दान् वाचो विग्लापनं हि तत्
ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः ।
पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ॥
अविज्ञाते परे तत्त्वे शास्त्राधीतिस्तु निष्फला ।
विज्ञातेऽपि परे तत्त्वे शास्त्राधीतिस्तु निष्फला ॥
सत्यानन्दस्वरूपं धीसाक्षिणं बोधविग्रहम् ।
चिन्तयात्मतया नित्यं त्यक्त्वा देहादिगां धियम् ।
अनात्मचिन्तनं त्यक्त्वा कश्मलं दुःखकारणम् ।
चिन्तयात्मानमानन्दरूपं यन्मुक्तिकारणम् ॥
यदेकं यत्परं नित्यं यदनन्तं चिदात्मकम् ।
यदेकं व्यापकं लोके तद्रूपं चिन्तयाम्यहम् ॥
तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनम् ।
एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः ॥
उत्तमा तत्त्वचिन्तैव मध्यमं शास्त्रचिन्तनम् ।
अधमा मंत्रचिन्ता च तीर्थभ्रान्त्यधमाधमा ॥
आत्मतीर्थं समुत्सृज्य बहिस्तीर्थानि यो व्रजेत् ।
करस्थं सं महारत्नं त्यक्त्वा काचं विमार्गते ॥
तीर्थे दाने जपे यज्ञे काष्ठे पाषाणके सदा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवं पश्यति मूढात्मा शिवे देहे प्रतिष्ठिते ॥
द्रक्ष्यसि निजहृदयस्थं देवम् ।
अत्यन्तमलिनो देहो देही चात्यन्तनिर्मलः ।
अहं शुद्ध इति ज्ञानं शौचमाहुर्मनीषिणः ॥
ज्ञानशौचं परित्यज्य बाह्ये यो रमते नरः ।
स मूढः काञ्चनं त्यक्त्वा लोष्टं गृह्णाति सुव्रत ॥
हृदयं निर्मलं कृत्वा चिन्तयित्वाप्यनामयम् ।
अहमेव परं सर्वमिति पश्येत्परं सुखम् ॥
शास्त्रदृष्ट्या तूपदेशो वामदेववत् ।
असंगोऽहं चिदात्माऽहमिति शास्त्रीयदृष्टितः ।
अहंशब्दं प्रयुङ्क्तेऽयं कूटस्थे केवले बुधः ॥
एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान् ।
सूर्यो यथा सर्वलोकस्य चक्षुर्न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥
यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥
न नभो घटयोगेन सुरागन्धेन लिप्यते ।
तथात्मोपाधियोगेन तद्धर्मैर्नैव लिप्यते ॥
न साक्षिणं साक्ष्यधर्माः संस्पृशन्ति विलक्षणम् ।
अविकारमुदासीनं गृहधर्माः प्रदीपवत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

असङ्गो ह्ययं पुरुषः ।
यथाऽनलो दारुषु भिन्न ईयते
यथाऽनिलो देहगतः पृथक् स्थितः ।
यथा नभः सर्वगतं न सज्जते
तथा पुमान् सर्वगुणाश्रयः परः ॥
क्षेत्रज्ञः परमात्मा च तयोरैक्यं यदा भवेत् ।
परतत्त्वं विजानाति सोऽतिवर्णाश्रमी भवेत् ॥
सर्वोपाधिविनिर्मुक्तं चैतन्यं च निरन्तरम् ।
तद्ब्रह्माहमिति ज्ञात्वा कथं वर्णाश्रमी भवेत् ॥
चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम् ।
द्वाभ्यां शून्यतरं विद्धि चिदाकाशं महामुने ॥
घटाकाशं महाकाश इवात्मानं परात्मनि ।
विलाप्याखण्डभावेन तूष्णीं भव सदा मुने ॥
सर्ववेदान्तसारं यद् ब्रह्मात्मैकत्वलक्षणम् ।
वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम् ॥
बिम्बप्रतिबिम्बदर्शनेन भेदभ्रमो निवृत्तः ।
स्फटिकलोहितदर्शनेन पारमार्थिककर्तृत्वभ्रमो निवृत्तः ॥
घटमठाकाशदर्शनेन सङ्गीति भ्रमो निवृत्तः ।
रज्जुसर्पदर्शनेन कारणाद्भिन्नजगतः सत्यत्वभ्रमो निवृत्तः
कनकरुचकदर्शनेन विकारित्वभ्रमो निवृत्तः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदा जीवः परित्यज्य जीवेश्वरभिदा भ्रमम् ।
एकं ब्रह्म विजानाति ब्रह्मज्ञानं तदुच्यते ॥
को देवो यो मनःसाक्षी मनो मे दृश्यते मया ।
तर्हि देवस्त्वमेवासि एको देव इति श्रुतेः ॥
आत्ममध्यं मनः कुर्यादात्मानं परमात्मनि ।
परमात्मा स्वयं भूत्वा न किंचिदपि चिंतयेत् ॥
चिदिहास्तीति चिन्मात्रमिदं चिन्मयमेव च ।
चित्त्वं चिदिदमेते च लोकाश्चिदिति भावय ॥
स्वचैतन्ये स्वयं स्थास्ये स्वात्मराज्ये सुखे रमे ।
स्वात्मसिंहासने स्थित्वा स्वात्मनोऽन्यन्न चिन्तये ॥
अहं ब्रह्म परं ब्रह्म ब्रह्माहं परमं पदम् ।
एवं समीक्षन्नात्मानमात्मन्याधाय निष्कले ॥
अहमेव परं ब्रह्म ब्रह्माहमिति संस्थितिः ।
समाधिः स तु विज्ञेयः सर्ववृत्तिविवर्जितः ॥
यत्परं यद्गुणातीतं यज्ज्योतिरमलं शिवम् ।
तदेव परमं तत्त्वं कैवल्यपदकारणम् ॥
सदानन्दं परमानन्दं शान्तं शाश्वतं सदाशिवम् ।
ब्रह्मादिवन्दितं योगिध्येयं परं पदं यत्र गत्वा न निवर्तन्ते ।
कर्मबंधहानिस्तद्दर्शनात् ।
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावरे ।
देहे ज्ञानेन दीपिते बुद्धिरखण्डाकाररूपा यदा भवति
तदा विद्वान्ब्रह्मज्ञानाग्निना कर्मबन्धं निर्दहेत् ॥
निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ।
अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ॥
यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन ।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥
अहं ब्रह्मेति विज्ञानात्कल्पकोटिशतार्जितम् ।
संचितं विलयं याति प्रबोधात्स्वप्नकर्मवत् ॥
आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ज्ञाननिर्मथनाभ्यासात्पापं दहति पण्डितः ॥
तदधिगम उत्तरपूर्वाघयोर-
श्लेषविनाशौ तद्व्यपदेशात् ।
तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयते
एवं हास्य सर्वे पाप्मानः प्रदूयन्ते ।
यथा पुष्करपलाश आपो न श्लिष्यन्त
एवमेवंविदि पापं कर्म न श्लिष्यते ।
सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम् ।
ज्ञानोदयात्पुरारब्धं कर्म ज्ञानान्न नश्यति ।
अदत्त्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनारब्धं कार्ये एव तु पूर्वे तदवधेः ।
भोगेन त्वितरे क्षपयित्वा सम्पद्यते ।
कृष्णो भोगी शुकस्त्यागी नृपौ जनकराघवौ ।
वसिष्ठः कर्मकर्ता च पंचैते ज्ञानिनः समाः ॥
योगरतो वा भोगरतो वा संगरतो वा संगविहीनः ।
यस्य ब्रह्मणि रमते चित्तं नन्दति नन्दति नन्दयते वा ॥

अथ अभेदबोधकश्रुतयः ।

आकाशवत्सर्वगतं सुसूक्ष्मं निरञ्जनं निष्क्रियं सन्मात्रम् ।
चिदानन्दैकरसं शिवं प्रशान्तममृतं तत्परं च ब्रह्म तत्त्वमसि॥
स य एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं
स आत्मा तत्त्वमसि श्वेतकेतो ॥
तत्त्वमस्यादिवाक्यैस्तु तयोरैक्यं प्रदर्श्यते ।
सोऽयं पुरुष इत्युक्ते पुमानेको हि बुद्ध्यते ॥
प्रज्ञानमानन्दं ब्रह्म तत्त्वमसि ।
अयमात्मा ब्रह्म अहं ब्रह्मास्मि ॥
विशुद्धं केवलं ज्ञानं निर्विशेषं निरञ्जनम् ।
यदेकं परमानन्दं तत्त्वमस्यद्वयं परम् ॥
कर्मशास्त्रे कुतो ज्ञानं तर्के नैवास्ति निश्चयः ।
सांख्ययोगौ द्विधापन्नौ शाब्दिकाः शब्दतत्पराः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तार्किकाणां च जीवेशौ वाच्यावेतौ विदुर्बुधाः ।
लक्ष्यौ च सांख्ययोगाभ्यां वेदान्तैरैक्यतानयोः ॥
त्वमर्थो विषयज्ञानं विज्ञानं तत्पदाश्रयम् ।
पदयोरैक्यबोधस्तु ज्ञानविज्ञानसंज्ञकम् ॥
संसर्गो वा विशिष्टो वा वाक्यार्थो नात्र संमतः ।
अखण्डैकरसत्वेन वाक्यार्थो विदुषां मतः ॥
कार्यकारणवाच्यांशौ जीवेशौ यौ जहच्च तौ ।
अजहच्चैतयोर्लक्ष्यौ चिदंशावेकरूपिणौ ॥
अभेदेपि पृथक्त्वमुपाधिभेदात् ।
कूटस्थब्रह्मणोर्भेदो नाममात्राद्दते न हि ।
घटाकाशमहाकाशौ वियुज्येते न हि क्वचित् ॥
नोपाधिभेदादन्यत्वमाकाशवत् ।
यथाकाशो हृषीकेशो नानोपाधिगतो विभुः ।
तद्भेदाद्भिन्नवद्भाति तन्नाशे सति केवलः ॥
मायाख्यायाः कामधेनोर्वत्सौ जीवेश्वरावुभौ ।
यथेच्छं पिबतां द्वैतं तत्त्वं त्वद्वैतमेव हि ॥
चोद्यं वा परिहारो वा क्रियतां द्वैतभाषया ।
अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरम् ॥
मायोपाधिर्जगद्योनिः सर्वज्ञत्वादिलक्षणः ।
पारोक्ष्यशबलः सत्याद्यात्मकस्तत्पदाभिधः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आलम्बनतया भाति योऽसत्प्रत्ययशब्दयोः ।
अन्तःकरणसंभिन्नबोधः स त्वंपदाभिधः ॥
मायाविद्ये विहायैव उपाधिपरजीवयोः ।
अखण्डं सच्चिदानन्दं परं ब्रह्म विलक्ष्यते ॥
प्रत्यग्बोधो य आभाति सोऽद्वयानंदलक्षणः ॥
अद्वयानन्दरूपश्च प्रत्यग्बोधैकलक्षणः ॥
घटसागरांबुवदेकरूपकत्वात् ।
यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति ।
एवं मुनेर्विजानत आत्मा भवति गौतम ॥
क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥
अस्मिन्नस्य च तद्योगं शास्ति ।
यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् ।
सूक्ष्मात्सूक्ष्मतरं नित्यं स त्वमेव त्वमेव तत् ॥
त्वं वा अहमस्मि भगवो देवतेऽहं वै त्वमसि देवते ।
अहं भवान्न चान्यस्त्वं त्वमेवाहं विचक्ष्व भोः ।
ननौ पश्यंति कवयश्छिद्रं जातु मनागपि ॥
स्वल्पमप्यन्तरं कृत्वा जीवात्मपरमात्मनोः ।
यस्तिष्ठति विमूढात्मा भयं तस्यापि भाषितम् ॥
अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न स वेद यथा पशुरेवं स देवानाम् ॥
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति ।
द्वितीयाद्वै भयं भवति ।
चक्षुर्दृष्टिनिरोधेऽभ्रैः सूर्यो नास्तीति मन्यते ।
तथाज्ञानावृतो देही ब्रह्म नास्तीति मन्यते ॥
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।
ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥
देहात्मज्ञानवज्ज्ञानं देहात्मज्ञानबाधकम् ।
आत्मन्येव भवेद्यस्य स नेच्छन्नपि मुच्यते ॥
आत्मा वा इदमित्यादौ परोक्षं ब्रह्म लक्षितम् ।
अध्यारोपापवादाभ्यां प्रज्ञानं ब्रह्म दर्शितम् ॥
परोक्षज्ञानतो नश्येदसत्त्वावृत्तिहेतुता ।
अपरोक्षज्ञाननाश्या ह्यभानावृत्तिहेतुता ॥
अस्ति ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत् ।
अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते ॥
ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्तिरपेक्षिता ।
स्वयं स्फुरणरूपत्वान्नाभास उपयुज्यते ॥
चक्षुर्दीपावपेक्ष्येते घटादेर्दर्शने यथा ।
न दीपदर्शने किंतु चक्षुरेकमपेक्ष्यते ॥
स्थितोऽप्यसौ चिदाभासो ब्रह्मण्येकीभवेत्परम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न तु ब्रह्मण्यतिशयं फलं कुर्याद्घटादिवत् ॥
बुद्धितत्स्थचिदाभासौ द्वावेतौ व्याप्नुतो घटम् ।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत् ॥
धीवृत्त्याभासकुम्भानां समूहो भास्यते चिति ।
कुम्भमात्रफलत्वात्स एक आभासतः स्फुरेत् ॥
सर्वभूतेषु येनैकं भावमव्ययमीक्षते ।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥
सर्वशरीरेषु चैतन्यैकतानता ध्यानम् ।
जीवात्मपरमात्मैक्यावस्था त्रिपुटिरहिता
परमानन्दस्वरूपा शुद्धचैतन्यात्मिका भवति ।
नष्टे पूर्वविकल्पे तु यावदन्यस्य नोदयः ।
निर्विकल्पकचैतन्यं स्पष्टं तावद्विभासते ।
चिन्मात्रममलमक्षयमद्वयमानन्दमनुभवारूढम् ।
ब्रह्मैवास्ति तदन्यन्न किंचिदस्तीति निश्चयो विदुषाम् ॥
तन्निष्ठस्य मोक्षोपदेशात् ।
तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।
गच्छन्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः ॥
न योगेन न सांख्येन कर्मणा नो न विद्यया ।
ब्रह्मात्मैकत्वबोधेन मोक्षः सिद्ध्यति नान्यथा ॥
ये तु वृत्तिं विजानन्ति ज्ञात्वा वै वर्धयन्ति ये ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ते वै सत्पुरुषा धन्या वन्द्यास्ते भुवनत्रये ॥
ब्रह्मैवास्मीति सद्वृत्त्या निरालम्बतया स्थितिः ।
ध्यानशब्देन विख्यातः परमानन्ददायकः ॥
निर्विकारतयावृत्त्या ब्रह्माकारतया पुनः ।
वृत्तिविस्मरणं सम्यक्समाधिर्ज्ञानसंज्ञकः ॥
तदेवाऽर्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ।
ध्यातृध्याने परित्यज्य क्रमाद्ध्येयैकगोचरम् ।
निवातदीपवच्चित्तं समाधिरभिधीयते ॥

समाधिनिर्धूतमलस्य चेतसो
निवेशितस्यात्मनि यत्सुखं भवेत् ।
न शक्यते वर्णयितुं गिरा तदा
स्वयं तदंतःकरणेन गृह्यते ॥

धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः ।
वर्षत्येष यथा धर्मामृतधाराः सहस्रशः ॥
कुलं पवित्रं जननी कृतार्था वसुंधरा पुण्यवती च तेन ।
अपारसच्चित्सुखसागरेऽस्मिन् लीने परब्रह्मणि यस्य चेतः

यदा सर्वाणि भूतानि समाधिस्थो न पश्यति ।
एकीभूतः परेणासौ तदा भवति केवलः ।
यत्र सुप्ता जना नित्यं प्रबुद्धस्तत्र संयमी ।
प्रबुद्धा यत्र ते विद्वान्सुषुप्तिं याति योगिराट् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ जीवन्मुक्त्यनुभवबोधकश्रुतयः ।

यस्मिन्काले स्वमात्मानं योगी जानाति केवलम् ।
तस्मात्कालात्समारभ्य जीवन्मुक्तो भवेदसौ ॥
चिदात्माहं परात्माहं निर्गुणोऽहं परात्परः ।
आत्ममात्रेण यस्तिष्ठेत्स जीवन्मुक्त उच्यते ॥

जीवः पञ्चविंशकः स्वकल्पितचतुर्विंशतितत्त्वं परित्यज्य षड्विंशः परमात्माहमिति निश्चयाज्जीवन्मुक्तो भवति ।

देहत्रयातिरिक्तोऽहं शुद्धचैतन्यमस्म्यहम् ।
ब्रह्माहमिति यस्यान्तः स जीवन्मुक्त उच्यते ॥
प्रजहाति यदा कामान् सर्वांश्चित्तगतान्मुने ।
मयि सर्वात्मके तुष्टः स जीवन्मुक्त उच्यते ॥
सर्वाधिष्ठानसन्मात्रे निर्विकल्पे चिदात्मनि ।
यो जीवति गतस्नेहः स जीवन्मुक्त उच्यते ॥
यः समः सर्वभूतेषु जीवितं तस्य शोभते ।
कुर्वतोऽकुर्वतो वापि स जीवन्मुक्त उच्यते ॥
आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः ।
य स्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥
मृता मोहमयी माता जातो बोधमयः सुतः ।
सूतकद्वयसंप्राप्तौ कथं संध्यामुपास्महे ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हृदाकाशे चिदादित्यः सदा भासति भासति ।
नास्तमेति न चोदेति कथं संध्यामुपास्महे ॥
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ।
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ॥
अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ।
न लिप्यते ज्ञानवांश्च सर्वदोषैरपि क्वचित् ।
यथा रविः सर्वरसान्प्रभुङ्क्ते हुताशनश्चापि हि सर्वभक्षः
तथैव योगी विषयान्प्रभुङ्क्ते न लिप्यते पुण्यपापैश्च शुद्ध
आनन्दरूपोऽहमखण्डबोधः
परात्परोऽहं घनचित्प्रकाशः ।
मेघा यथा व्योम न च स्पृशन्ति
संसारदुःखानि न मां स्पृशन्ति ॥
वेदैरनेकैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ।
न पुण्यपापे मम नास्ति नाशो न जन्म देहेन्द्रियबुद्धिरस्ति ।
नाहं देहो जन्ममृत्युः कुतो मे नाहं प्राणः क्षुत्पिपासे कुतो
नाहं चेतः शोकमोहौ कुतो मे नाहं कर्ता बन्धमोक्षौ कुतो
नाहं मनुष्यो न च देवयक्षो न ब्राह्मणक्षत्रियवैश्यशूद्राः ।
न ब्रह्मचारी न गृही वनस्थो भिक्षुर्न चाहं निजबोधरूपः ।
नारायणोऽहं नरकान्तकोऽहं पुरान्तकोऽहं पुरुषोऽहमीशः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अखण्डबोधोऽहमशेषसाक्षी निरीश्वरोऽहं निरहं च निर्ममः ॥
मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहम् ॥
शरीरत्रितयादन्यः पंचकोशविलक्षणः ।
अवस्थात्रितयातीतं प्रत्यगात्माहमव्ययः ।
स्थूलदेहविहीनात्मा सूक्ष्मदेहविवर्जितः ।
कारणादिविहीनात्मा तुरीयादिविवर्जितः ॥
अन्नकोशविहीनात्मा प्राणकोशविवर्जितः ।
मनःकोशविहीनात्मा विज्ञानादिविवर्जितः ॥
आनन्दकोशहीनात्मा पञ्चकोशविवर्जितः ।
निर्विकल्पस्वरूपात्मा सविकल्पविवर्जितः ॥
ओंकारवाच्यहीनात्मा सर्ववाच्यविवर्जितः ।
अवस्थात्रयहीनात्मा अक्षरात्मा चिदात्मकः ॥
भानाभानविहीनात्मा वैदेही मुक्त एव सः ।
चिदक्षरोऽहं सत्योऽहं वासुदेवोऽजरोऽमरः ।
केवलं चित्सदानन्दो ब्रह्मैवाहं जनार्दनः ।
बहिरन्तश्च सर्वत्र संपश्यन्हि जनार्दनम् ।
परमात्मा परञ्ज्योतिः परं धाम परा गतिः ।
सर्ववेदान्तसारोऽहं सर्वशास्त्रसुनिश्चितः ॥
चिदाकारं चिदाकाशं चिदेव परमं सुखम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहं ब्रह्म चिदाकाशं नित्यं ब्रह्म निरञ्जनम् ॥
शुद्धं बुद्धं सदामुक्तमनामकमरूपकम् ।
ब्रह्मैवाहं सर्ववेदान्तवेद्यं नाहं वेद्यं व्योमवातादिरूपम् ।
रूपं नाहं नाम नाहं न कर्म ब्रह्मैवाहं सच्चिदानन्दरूपम्
केवलं शान्तरूपोऽहं केवलं चिन्मयोऽस्म्यहम् ।
केवलं नित्यरूपोऽहं केवलं शाश्वतोऽस्म्यहम् ॥
चिद्रूपमात्रं ब्रह्मैव सच्चिदानन्दमद्वयम् ।
आनन्दघन एवाहमहं ब्रह्मास्मि केवलम् ॥
सर्वोपाधिविनिर्मुक्तं सत्तामात्रमगोचरम् ।
सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषम् ॥
अहमेव परं ब्रह्म सच्चिदानन्दलक्षणम् ।
निष्कलं निष्क्रियं शान्तं निर्विकल्पं निरञ्जनम् ॥
सर्वान्तरः स्वयंज्योतिः सर्वाधिपतिरस्म्यहम् ।
सर्वभूताधिवासोऽहं सर्वव्यापी स्वराडहम् ॥
अन्वयव्यतिरेकाभ्यां जाग्रत्स्वप्नसुषुप्तिषु ।
यदेकं केवलं ज्ञानं तदेवाहं परं बृहत् ॥
यन्मायारहितं शुद्धमक्षरं चाव्ययं परम् ।
सत्यं ज्ञानसुखानन्तं तदहं ब्रह्म निर्भयम् ॥
स्थाणुर्नित्यः सदानन्दः शुद्धो ज्ञानमयोऽमलः ।
आत्माहं सर्वभूतानां विभुः साक्षी न संशयः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अहमाकाशवत्सर्वं बहिरन्तर्गतोऽच्युतः ।
सदा सर्वसमः शुद्धो निःसंगो निर्मलोऽचलः ॥
निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः ।
निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः ॥
निष्कलोऽहमचिन्त्योऽहं निष्क्रियोऽहं निरामयः ।
निर्विशेषस्वरूपोऽहं निरवद्यो निरञ्जनः ॥
नित्योऽहं निरवद्योऽहं निष्क्रियोऽस्मि निरञ्जनः ।
निर्मलो निर्विकल्पोऽहं निराख्यातोऽस्मि निश्चलः ॥
निष्क्रियोऽस्म्यविकारोऽस्मि निष्कलोऽस्मि निराकृतिः ।
निर्विकल्पोऽस्मि नित्योऽस्मि निरालम्बोऽस्मि निर्द्वयः ॥
निर्विकल्पो निराभास एक आत्मास्मि सर्वगः ।
केवलाखण्डबोधोऽहं स्वानन्दोऽहं निरन्तरः ॥
सबाह्याभ्यन्तरव्यापी निष्कलोऽहं निरञ्जनः ।
सर्वात्मकोऽहं सर्वोऽहं सर्वातीतोऽहमद्वयः ॥
स्वयं ब्रह्मा स्वयं विष्णुः स्वयमिन्द्रः स्वयं शिवः ।
स्वयं विश्वमिदं सर्वं स्वस्मादन्यन्न किंचन ॥

यदज्ञानतो भाति विश्वं समस्तम्
विनष्टं च सद्यो यदात्मप्रबोधे ।
मनोवागतीतं विशुद्धं विमुक्तम्
परब्रह्म नित्यं तदेवाहमस्मि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनन्तं विभुं सर्वयोनिं निरीहम्
शिवं संगहीनं यदोंकारगम्यम् ।
निराकारमत्युज्ज्वलं मृत्युहीनम्
परं ब्रह्म नित्यं तदेवाहमस्मि ॥
यदानन्दरूपं प्रकाशस्वरूपम्
निरस्तप्रपञ्चं परिच्छेदशून्यम् ।
अहंब्रह्मवृत्त्यैकगम्यं तुरीयम्
परब्रह्म नित्यं तदेवाहमस्मि ॥
सर्वाधारं सर्ववस्तु प्रकाशम्
सर्वाकारं सर्वगं सर्वशून्यम् ।
नित्यं शुद्धं निश्चलं निर्विकल्पम्
ब्रह्माद्वैतं यत्तदेवाहमस्मि ॥
न जाग्रन्न मे स्वप्नको वा सुषुप्ति-
र्न विश्वो न वा तैजसः प्राज्ञको वा ।
अविद्यात्मकत्वात्त्रयाणां तुरीयं
तदेकोऽवशिष्टः शिवः केवलोऽहम् ॥
यथा दर्पणाभाव आभासहानौ
मुखं विद्यते कल्पनाहीनमेकम् ।
तथा धीवियोगे निराभासको यः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समस्तेषु वस्तुष्वनुस्यूतमेकं
समस्तानि वस्तूनि यन्न स्पृशंति ।
वियद्वत्सदा शुद्धसच्चित्स्वरूपः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥
कोशेषु पंचस्वधिराजमाना
बुद्धिर्भवानी प्रतिदेहगेहम् ।
साक्षी शिवः सर्वगतोऽन्तरात्मा
सा काशिकाहं निजबोधरूपा ॥
विश्वेशोऽयं तुरीयः सकलजनमनःसाक्षिभूतोऽन्तरात्मा ।
देहे सर्वं मदीये यदि वसति पुनस्तीर्थमन्यत्किमस्ति ॥
संपूर्णं जगदेवं नन्दनवनं सर्वेऽपि कल्पद्रुमाः ।
गांगं वारि समस्तवारिनिवहः पुण्याः समस्ताः क्रियाः ॥
वाचः प्राकृतसंस्कृताः श्रुतिशिरो वाराणसी मेदिनी ।
सर्वावस्थितिरस्य वस्तुविषया दृष्टे परब्रह्मणि ॥
तथैव ज्ञानवान् जीवः परमात्मनि सर्वदा ।
ऐक्येन रमते ज्ञानी यत्र कुत्र दिवानिशम् ॥

अथ विदेहकैवल्यबोधकश्रुतयः ।

सम्पाद्याऽऽविर्भावः स्वेन शब्दात् ।
अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं
ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तनुं त्यजतु वा तीर्थे श्वपचस्य गृहेऽथवा ।
ज्ञानसंपत्तिसमये मुक्तोऽसौ विगताशयः ॥
न तस्य प्राणा उत्क्रामन्ति अत्रैव समवलीयन्ते ।
ब्रह्मैव सन्ब्रह्माप्येति ।
अत्रैव ब्रह्मयोगो व्यापकत्वात् ।
अविभागेन दृष्टत्वात् ।
गतिसाम्यं विभागाभावात् ।
न पुनर्वियोगोऽश्रवणात् ।
पररूपेणावस्थानं कैवल्यम् ।
यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहा
तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥
न मोक्षो नभसः पृष्ठे न पाताले न भूतले ।
अविचारकृतो बन्धो विचारान्मोक्षो भवति ।
समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता ।
तीर्थे श्वपचगृहे वा तनुं विहाय याति कैवल्यम् ।
तीर्थे चान्त्यजगेहे वा नष्टस्मृतिरपि त्यजन् ।
समकाले तनुं मुक्त्वा कैवल्यव्यापको भवेत् ॥
देवो भूत्वा देवानप्येति ।
आत्मा परेऽव्यये सर्व एकीभवन्ति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

स एषोऽकलोऽमृतो भवति ।

गृहं गृहपतिरिव देही देहान्ते परमात्मानं प्रविशति ।
घटाकाशमिवात्मानं विलयं वेत्ति तत्त्वतः ।
स गच्छति निरालम्बं ज्ञानलोकं समन्ततः ॥

ब्रह्म वेद ब्रह्मैव भवति ।

यथा घटविनाशेन घटाकाशो नराधिप ।
विलीयते महाकाशे तथा ब्रह्मणि ब्रह्मवित् ॥

ॐ ब्रह्मविदाप्नोति परम् ।

घटे भिन्ने घटाकाश आकाशे लीयते यथा ।
देहाभावे तथा योगी स्वरूपे परमात्मनि ॥

ब्रह्मसंस्थोऽमृतत्वमेति ।

समुद्रे वै यथा तोयं क्षीरे क्षीरं जले जलम् ।
भिन्ने कुम्भे यथाकाशं तथात्मा परमात्मनि ॥
घटे नष्टे यथा व्योम व्योमैव भवति स्वयम् ।
तथैवोपाधिविलये ब्रह्मैव ब्रह्म वित्स्वयम् ॥
जीवस्योपाधिशून्यस्य ब्रह्मरूपेण या स्थितिः ।
मुक्तिर्वेदान्तसिद्धान्ते निर्गुणा सा समीरिता ॥
द्वाविमावपि पन्थानौ ब्रह्मप्राप्तिकरौ शिवौ ।
सद्योमुक्तिप्रदश्चैकः क्रममुक्तिप्रदः परः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुक्तोपसृप्यव्यपदेशात् ।
यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥

अथ प्रणवचिंतनबोधकश्रुतयः ।

ॐकारं बिंदुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैव ॐकाराय नमोनमः ॥
श्रीनृसिंहं महाबाहुं महान्तं दीप्ततेजसम् ।
चिदानन्दमयं नित्यं प्रणवं ज्योतिरूपिणम् ॥
प्रत्यगानन्दं ब्रह्मपुरुषं प्रणवस्वरूपम् ।
ॐमित्येतदक्षरमिदं सर्वम् ।
सर्वे वेदा यत्पदमामनन्ति
तपांसि सर्वाणि च यद्वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत् ॥
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
मूलमन्त्रं विजानाति यो विद्वान्गुरुदर्शितम् ॥
ॐमित्येतदक्षरं परं ब्रह्म तदेवोपासितव्यम् ।
आत्मानमरणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ध्याननिर्मथनाभ्यासादेवं पश्येन्निगूढवत् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समाधिसिद्धिरीश्वरप्रणिधानात् ।
हृत्पद्मकर्णिकामध्ये स्थिरदीपनिभाकृतिम् ।
अंगुष्ठमात्रमचलं ध्यायेदोंकारमीश्वरम् ॥
अकारे संस्थितो ब्रह्मा उकारे विष्णुरास्थितः ।
मकारे संस्थितो रुद्रस्ततोऽस्यान्तः परात्परः ॥
चैतन्यमात्रमोंकारं ब्रह्मैव सकलं स्वयम् ।
अहमेव जगत्सर्वमहमेव परं पदम् ॥
धनुर्हि तस्य प्रणवं पठंति शरं तु जीवं परमेव लक्ष्यम् ।
प्रणवो धनुः शरो ह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते ।
अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत् ॥
क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः ।
तस्य वाचकः प्रणवः ।
तज्जपस्तदर्थभावनम् ।
बद्धपद्मासनो योगी नमस्कृत्य गुरुं शिवम् ।
नासाग्रदृष्टिरेकान्ते जपेदोंकारमव्ययम् ॥
शुचिर्वाप्यशुचिर्वापि यो जपेत्प्रणवं सदा ।
न स लिप्यति पापेन पद्मपत्रमिवाम्भसा ॥
बुद्धतत्त्वेन धीदोषशून्येनैकांतवासिना ।
दीर्घं प्रणवमुच्चार्य मनोराज्यं विजीयते ॥
तैलधारामिवाच्छिन्नं दीर्घघण्टानिनादवत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अवाच्यं प्रणवस्याग्रे यस्तं वेद स वेदवित् ॥
ॐमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥
ॐकाररथमारुह्य विष्णुं कृत्वाथ सारथिम् ।
ब्रह्मलोकपदान्वेषी रुद्राराधनतत्परः ॥
प्रणवं हीश्वरं विद्यात्सर्वस्य हृदि संस्थितम् ।
सर्वव्यापिनमोंकारं मत्वा धीरो न शोचति ॥
युञ्जीत प्रणवे चेतः प्रणवो ब्रह्म निर्भयम् ।
प्रणवे नित्ययुक्तस्य न भयं विद्यते क्वचित् ॥
ॐकारप्रभवं सर्वं त्रैलोक्यं सचराचरम् ।
ॐकारं यो न जानाति ब्रह्मणो न भवेत्तु सः ॥
त्रिस्थानं च त्रिमात्रं च त्रिब्रह्म च त्रयाक्षरम् ।
त्रिमात्रमर्धमात्रं वा यस्तं वेद स वेदवित् ॥
ओमित्येकाक्षरं ब्रह्म ध्येयं सर्वैर्मुमुक्षुभिः ।
अर्धमात्रासमायुक्तः प्रणवो मोक्षदायकः ॥

ईक्षतिकर्मव्यपदेशात्सः ।

य उपास्ते त्रिमात्रेण ब्रह्मलोके स नीयते ।
स एतस्माज्जीवघनात्परं पुरुषमीक्षते ॥
स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते ।
ओतमोतेन जानीयादनुज्ञातारमान्तरम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुज्ञामद्वयं लब्ध्वा उपद्रष्टारमाव्रजेत् ॥
पिण्डब्रह्माण्डयोरैक्यं लिङ्गसूत्रात्मनोरपि ।
स्वापाव्याकृतयोरैक्यं स्वप्रकाशचिदात्मनोः ॥
स्थूलवैराजयोरैक्यं सूक्ष्महैरण्यगर्भयोः ।
अज्ञानमाययोरैक्यं प्रत्यग्विज्ञानपूर्णयोः ॥
शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः ।
अकाराक्षरसंभूतः सौमित्रिर्विश्वभावनः ।
उकाराक्षरसंभूतः शत्रुघ्नस्तैजसात्मकः ॥
प्राज्ञात्मकस्तु भरतो मकाराक्षरसंभवः ।
अर्धमात्रात्मको रामो ब्रह्मानन्दैकविग्रहः ॥
अखण्डैकरसानन्दस्तारकब्रह्मवाचकः ।
रामायेति सुविज्ञेयः सत्यानन्दचिदात्मकः ॥
एकमेवाद्वयं ब्रह्म मायया च चतुष्टयम् ।
रोहिणीतनयो विश्व अकाराक्षरसंभवः ॥
तैजसात्मकः प्रद्युम्न उकाराक्षरसंभवः ।
प्राज्ञात्मकोऽनिरुद्धोऽसौ मकाराक्षरसंभवः ॥
अर्धमात्रात्मकः कृष्णो यस्मिन्विश्वं प्रतिष्ठितम् ।
कृष्णात्मिका जगत्कर्त्री मूलप्रकृतिरुक्मिणी ॥
अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः ।
ॐकारो विदितो येन स मुनिर्नेतरो जनः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कार्यं बादरिरस्य गत्युपपत्तेः ।
यं यमन्तमभिकामो भवति यं कामं कामयते सोऽस्
संकल्पादेव समुत्तिष्ठति तेन संपन्नो महीयते ॥
विभूतिसाम्यं विनारम्भात् ।
जगद्व्यापारवर्जम् ।
यथादर्शे तथात्मनि छायातपयोरिव ब्रह्मलोके ।
कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ।
ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति
ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते ।

अथाष्टांगयोगबोधकश्रुतयः ।

ॐ नमो भगवते विष्णवे सर्वभूतात्मने वासुदेवाय
सर्वात्मसंयोगयोगपीठात्मने नमः ॥
योगहीनं कथं ज्ञानं मोक्षदं भवति ध्रुवम् ।
योगो हि ज्ञानहीनस्तु न क्षमो मोक्षकर्मणि ॥
प्राणापानसमायोगो योगश्चित्तात्मनस्तथा ।
यत्र जीवेशयोर्योगस्तं योगं विद्धि भूपते ॥
संत्यज्य संकल्पविकल्पजालकम्
यत्र स्थितिं याति मनोऽन्तरात्मनि ।
योगं तमष्टांगमवेहि स ध्रुवम्
वैराग्यतोऽभ्यासबलाच्च सिद्ध्यति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यमनियमासनप्राणायामप्रत्याहार-
धारणाध्यानसमाधयोऽष्टाङ्गानि ।
अहिंसा सत्यमस्तेयं ब्रह्मचर्यं दयार्जवम् ।
क्षमा धृतिर्मिताहारः शौचं चैव यमा दश ॥
तपः संतोषमास्तिक्यं दानमीश्वरपूजनम् ।
सिद्धान्तश्रवणं चैव ह्रीर्मतिश्च जपो व्रतम् ॥
स्थिरसुखमासनम् ।
बद्धपद्मासनो योगी प्राणं चन्द्रेण पूरयेत् ।
धारयेद्वा यथाशक्त्या भूयः सूर्येण रेचयेत् ॥
पूरकं द्वादशं कुर्यात्कुम्भकं षोडशं भवेत् ।
रेचकं दश चोंकारः प्राणायामः स उच्यते ॥
केवले कुम्भके सिद्धे रेचपूरविवर्जिते ।
न तस्य दुर्लभं किंचित्त्रिषु लोकेषु विद्यते ॥
याममात्रं वासुदेवं चिन्तयेत्कुम्भकेन यः ।
सप्तजन्मार्जितं पापं तस्य नश्यति योगिनः ॥
इडा तिष्ठति वामेन पिङ्गला दक्षिणेन तु ।
तयोर्मध्ये परं स्थानं यस्तद्वेद स वेदवित् ॥
सुषुम्नैव परं तीर्थं सुषुम्नैव परो जपः ।
सुषुम्नैव परं ध्यानं सुषुम्नैव परा गतिः ॥
ब्रह्मा पूरक इत्युक्तो विष्णुः कुम्भक उच्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

रेचो रुद्र इति प्रोक्तः प्राणायामस्य देवताः ॥
अतसीपुष्पसंकाशं नाभिस्थाने प्रतिष्ठितम् ।
चतुर्भुजं महाविष्णुं पूरकेण विचिन्तयेत् ॥
कुम्भकेन हृदिस्थाने चिन्तयेत्कमलासनम् ।
ब्रह्माणं रक्तगौराभं चतुर्वक्त्रं पितामहम् ॥
रेचकेन तु विद्यात्मा ललाटस्थं त्रिलोचनम् ।
शुद्धस्फटिकसंकाशं निष्कलं पापनाशनम् ॥
विषयेभ्य इन्द्रियार्थेभ्यो मनो निरोधनं प्रत्याहारः ।
चित्तस्यैकत्र रोधो धारणा ।
विषयव्यावर्तनपूर्वकं चैतन्ये चेतःस्थापनं धारणं भवति
तत्र प्रत्ययैकतानता ध्यानम् ।
ध्येयाविष्टं यदा चित्तं तैलधारेव निश्चलम् ।
जायते पृथ्वीपाल तद्ध्यानं परिकीर्तितम् ॥
द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च ।
सगुणं निर्गुणं चैव द्विधा ध्यानं प्रकीर्तितम् ।
सगुणं व्यक्तियुक्तं स्यादव्यक्तं निर्गुणं भवेत् ॥
हृदम्बुजसमासीनं भगवन्तं रमापतिम् ।
चिन्तयेत्सुस्थिरो भूत्वा तेजःपुंजकलेवरम् ॥
समं प्रशान्तं सुमुखं दीर्घचारुचतुर्भुजम् ।
सुचारु सुंदरग्रीवं सुकपोलं शुचिस्मितम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समानकर्णविन्यस्तस्फुरन्मकरकुंडलम् ।
हेमाम्बरं घनश्यामं श्रीवत्सं श्रीनिकेतनम् ॥
शंखचक्रगदापद्मवनमालाविभूषितम् ।
नूपुरैर्विलसत्पादं कौस्तुभप्रभया युतम् ॥
द्युमत्किरीटकटककटिसूत्रांगदायुतम् ।
सर्वांगसुंदरं हृद्यं प्रसादसुमुखेक्षणम् ॥
ध्यायतो योगिनो यस्तु साक्षादेव प्रकाशते ।
अणिमादिफलं चैव सुखेनैवोपजायते ॥
यदि शैलसमं पापं विस्तीर्णं बहुयोजनम् ।
भिद्यते ध्यानयोगेन नान्यो भेदः कदाचन ॥
तपेद्वर्षसहस्राणि एकपादस्थितो नरः ।
एतस्य ध्यानयोगस्य कलां नार्हति षोडशीम् ॥
हृत्पुण्डरीकमध्यस्थं चैतन्यज्योतिरव्ययम् ।
अनन्तमानन्दमयं चिन्मयं भास्करं विभुम् ॥
सर्वशरीरेषु चैतन्यैकतानता ध्यानम् ।
तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः ।
प्रभाशून्यं मनःशून्यं बुद्धिशून्यं निरामयम् ।
सर्वशून्यं निराभासं समाधिरभिधीयते ॥
यदा संक्षीयते प्राणो मानसं च प्रलीयते ।
तदा समरसत्वं यत्समाधिरभिधीयते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टति तमाहुः परमां गतिम् ।
प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव ।
भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यम्
शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिःसृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्न्या उत्क्रमणे भवन्ति ॥
द्वाविमौ पुरुषव्याघ्र सूर्यमंडलभेदिनौ ।
परिव्राड् योगयुक्तश्च रणे चाभिमुखो हतः ॥
ब्रह्मद्वारमुखं नित्यं मुखेनाच्छाद्य तिष्ठति ।
येन द्वारेण गन्तव्यं ब्रह्मद्वारमनामयम् ॥
यस्येदं मण्डलं भित्त्वा मारुतो याति मूर्धनि ।
यत्र यत्र म्रियेद्वापि न स भूयोऽभिजायते ॥
तीर्थे चान्त्यजगेहे वा यत्र कुत्र मृतोऽपि वा ।
न योगी पश्यते गर्भं परे ब्रह्मणि लीयते ॥

अथ मंत्रयोगबोधकश्रुतयः ।

सोऽहं सोऽहमिति प्रोक्तो मन्त्रयोगः स उच्यते ।
प्रतीतिर्मन्त्रयोगाच्च जायते पश्चिमे पथि ॥
ब्रह्मचारिणे शान्ताय दान्ताय गुरुभक्ताय ।
हंस हंसेति सदा ध्यायन्सर्वेषु देहेषु व्याप्य वर्तते

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हकारेण बहिर्याति सकारेण विशेत्पुनः ।
हंस हंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ॥
हकारेण तु सूर्यः स्यात्सकारेणेन्दुरुच्यते ।
सूर्याचन्द्रमसोरैक्यं हठ इत्यभिधीयते ॥
उच्चैर्जपादुपांशुश्च सहस्रगुण उच्यते ।
मानसश्च तथोपांशोः सहस्रगुण उच्यते ॥
सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते ।
ध्यानस्य विस्मृतिः सम्यक्समाधिरभिधीयते ॥
अनाहतध्वनियुतं हंसं यो वेद हृद्गतम् ।
स्वप्रकाशचिदानन्दं स हंस इति गीयते ॥
अनाहतस्य शब्दस्य तस्य शब्दस्य यो ध्वनिः ।
ध्वनेरन्तर्गतं ज्योतिर्ज्योतिषोऽन्तर्गतं मनः ॥
मनो यत्र लयं याति तद्विष्णोः परमं पदम् ।
सदा नादानुसंधानात्संक्षीणा वासना तु या ।
निरञ्जने विलीयेते मनोवायू न संशयः ॥
तैलधारामिवाच्छिन्नं दीर्घघण्टानिनादवत् ।
विन्दुनादकलातीतं यस्तं वेद स वेदवित् ॥
अदृश्यं नवमे देहं दिव्यं चक्षुस्तथाऽमलम् ।
दशमे परमं ब्रह्म भवेद्ब्रह्मात्मसन्निधौ ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अंतर्ज्योतिर्बहिर्ज्योतिः प्रत्यग्ज्योतिः परात्परः ।
अंतर्ज्योतिः स्वयंज्योतिरात्मज्योतिः शिवोऽस्म्यहम्

भ्रुवोर्मध्ये वैशेष्यात् ।

भ्रूयुगमध्यविले दृष्टिं तद्द्वारोर्ध्वस्थिततेज आविर्भूतं तारकयोगो भवति ।

ज्योतिर्मयत्वेन तद्ध्यानम् ।

भ्रूमध्ये सच्चिदानन्दतेजः कूटरूपं तारकं ब्रह्म ।
ज्योतिर्लिङ्गं भ्रुवोर्मध्ये नित्यं ध्यायेत्सदा यतिः ।
भ्रुवोर्घ्राणस्य च यः संधिः स एष द्यौर्लोकस्य परः संधिर्भवति ।

ध्यायेन्नित्यं भ्रुवोर्मध्ये मीलिताक्षो निरंतरम् ।
प्रज्वलद्दीपकाकारं ब्रह्मज्योतिरनामयम् ॥

ज्योतीरूपेण तन्मयत्वात् ।

नीहारधूमार्कानलानिलानां खद्योतविद्युत्स्फटिकशशिनाम् ।
एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तिकराणि योगे

ब्रह्मज्योतिः प्रकाशस्तदनन्तरम् ।

नासाग्रे अच्युतं विद्यात्तस्यान्ते तु परं पदम् ।
भ्रुवोर्मध्ये शिवस्थानं मनस्तत्र विलीयते ।
ज्ञातव्यं तत्पदं तुर्यं तत्र कालो न विद्यते ॥
सर्वपरिपूर्णतुरीयातीतब्रह्मभूतो योगी भवति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ राजयोगबोधकश्रुतयः ।

कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा
धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव ॥

दुर्जयानामहं मनः ।

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च ।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥
मन एव मनुष्याणां कारणं बंधमोक्षयोः ।
बंधनं विषयासक्तिर्मुक्त्यै निर्विषयं मनः ॥

न भोगाद्रागशांतिर्मुनिवत् ।

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥
भिक्षाशनं तदपि नीरसमेकवारम्
शय्या च भूः परिजनो निजदेहमात्रम् ।
वस्त्रं सुजीर्णशतखण्डमयी च कंथा
हा हा तथापि विषयान्न जहाति चेतः ॥
समासक्तं यदा चित्तं जन्तोर्विषयगोचरे ।
यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बन्धनात् ।
अहंकारसुतं वित्तं भ्रातरं मोहमंदिरम् ।
आशापत्नीं त्यजेद्यावत्तावन्मुक्तो न संशयः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आशाया ये दासास्ते दासाः सर्वलोकानाम् ।
आशादासी येषां तेषां दासायते विश्वम् ॥
आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
निराशः सुखी पिङ्गलावत् ।
अभेददर्शनं ज्ञानं ध्यानं निर्विषयं मनः ।
स्नानं मनोमलत्यागः शौचमिन्द्रियनिग्रहः ॥
शुद्धशौचमिति प्रोक्तं मृज्जलाभ्यां तु लौकिकम् ।
चित्तशुद्धिकरं शौचं वासनात्रयनाशनम् ॥
जन्मांतरशताभ्यस्ता मिथ्या संसारवासना ।
सा चिराभ्यासयोगेन विना न क्षीयते क्वचित् ॥
स्वभावविजयः शौर्यम् ।
दानं स्वधर्मो नियमो यमश्च
श्रुतं च कर्माणि च सद्व्रतानि ।
सर्वे मनोनिग्रहलक्षणान्ताः
परो हि योगो मनसः समाधिः ॥
यत्रैकाग्रता तत्राविशेषात् ।
समे शुचौ शर्करावह्निवालुका-
विवर्जिते शब्दजलाश्रयादिभिः ।
मनोऽनुकूले न तु चक्षुपीडने
गुहा निवाताश्रयणे प्रयोजयेत् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दुःखहा ॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानसः ।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥
देहोपलमपाकृत्य बुद्धिकुद्दालकात्पुनः ।
खनित्वा मनोभुवं भूयो गृह्णीयान्मां निधिं पुमान् ॥
यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ॥
यदा विनियतं चित्तमात्मन्येवावतिष्ठते ।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥
न स्थाननियमश्चित्तप्रसादात् ।
चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम् ।
प्रसन्नात्मात्मनि स्थित्वा सुखमव्ययमश्नुते ॥
यत्रोपरमते चित्तं निरुद्धं योगसेवया ।
यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति ॥
यथा निरिन्धनो वह्निः स्वयोनावुपशाम्यति ।
तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति ॥
यन्मूलं सर्वलोकानां यन्मूलं चित्तबन्धनम् ।
मूलबन्धः सदा सेव्यो योग्योऽसौ ब्रह्मवादिनाम् ॥
इषुकारवन्नैकचित्तस्य समाधिहानिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिंदुना ।
मनसो निग्रहस्तद्वद्भवेदपरिखेदतः ॥
द्विविधश्चित्तनाशोऽस्ति सरूपोऽरूप एव च ।
जीवन्मुक्तौ सरूपः स्यादरूपो देहमुक्तिगः ॥
द्वौ क्रमौ चित्तनाशेऽस्य योगो ज्ञानं च राघव ।
योगस्तद्वृत्तिरोधो हि ज्ञानं सम्यगवेक्षणम् ॥

योगश्चित्तवृत्तिनिरोधः ।

अभ्यासवैराग्याभ्यां तन्निरोधः ।

तदा द्रष्टुः स्वरूपेऽवस्थानम् ।

चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम् ।
द्वाभ्यां शून्यतरं विद्धि चिदाकाशं महामुने ॥
यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः ।
यस्मिन्स्थितो न दुःखेन गुरुणापि विचाल्यते ॥
प्रसादे सर्वदुःखानां हानिरस्योपजायते ।
प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवतिष्ठते ॥
सदा ज्ञाताश्चित्तवृत्तयस्तत्प्रभोः पुरुषस्यापरिणामित्वात्
चित्तवृत्तेरतीतो यश्चित्तवृत्त्यवभासकः ।
सर्ववृत्तिविहीनात्मा वैदेही मुक्त एव सः ॥
समाधिः स तु विज्ञेयः सर्ववृत्तिविवर्जितः ।
ब्रह्म संपद्यते योगी न भूयः संसृतिं व्रजेत् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्म निर्वाणमृच्छति ॥
तदा मुक्तिर्यदा चित्तं न वाञ्छति न शोचति ।
न मुञ्चति न गृह्णाति न हृष्यति न कुप्यति ॥
स्नातं तेन समस्ततीर्थसलिले दत्तापि सर्वावनि-
र्यज्ञानां च कृतं सहस्रमखिला देवाश्च संपूजिताः ।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥
सत्यं माता पिता ज्ञानं धर्मो भ्राता दया सखा ।
शांतिः पत्नी क्षमा पुत्रः षडेते मम बांधवाः ॥
धैर्यं यस्य पिता क्षमा च जननी शांतिश्चिरं गेहिनी
सत्यं सूनुरयं दया च भगिनी भ्राता मनःसंयमः ॥
शय्या भूमितलं दिशोऽपि वसनं ज्ञानामृतं भोजनम्
एते यस्य कुटुम्बिनो वद सखे कस्माद्भयं योगिनः ॥

अथांतर्यामिबोधकश्रुतयः ।

नमस्ते सर्वभूतेश नमस्ते विश्वपालक ।
नमस्तेऽस्तु जगन्नाथ भूयो भूयो नमोस्तु ते ॥
येन सृष्टमिदं सर्वं जगदेतच्चराचरम् ।
अंतर्यामी च सर्वेषां जीवानां यो निरंतरम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐभूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं भर्गो
देवस्य धीमहि धीयो यो नः प्रचोदयात् ॥
ओमापोज्योतीरसोऽमृतं ब्रह्मभूर्भुवःस्वरोम् ।
आधारः सर्वविश्वस्य पालकश्च निरंतरम् ।
सर्वज्ञः सर्वशक्तिश्च तं विद्धि परमेश्वरम् ॥
प्रधानक्षेत्रज्ञपतिर्गुणेशः ।
आदित्यसन्निधौ लोकश्चेष्टते स्वयमेव तु ।
तथा मत्संनिधावेव समस्तं चेष्टते जगत् ॥
ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥
अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ।
अन्तर्यामिणं य इमं च लोकं परं च लोकं
सर्वाणि च भूतानि योऽन्तरो यमयति ।
य आदित्ये तिष्ठन्नादित्यान्तरो यमादित्यो न वेद यस्यादि
शरीरं य आदित्यमन्तरो यमयत्येषत आत्मान्तर्याम्यमृतः
यश्चक्षुषि तिष्ठंश्चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षुः
शरीरं यश्चक्षुरन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः।
यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यं विज्ञानं
न वेद यस्य विज्ञानं शरीरं यो विज्ञानमन्तरो-
यमयत्येष त आत्मान्तर्याम्यमृतः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यः सर्वेषु भूतेषु तिष्ठन्सर्वेभ्यो भूतेभ्योऽन्तरो
यं सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं
यः सर्वाणि भूतान्यन्तरो यमयत्येष त आत्मान्तर्याम्यमृतः ।
जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ।
केनापि देवेन हृदि स्थितेन यथा नियुक्तोऽस्मि तथा करोमि ॥

अंतस्तद्धर्मोपदेशात् ।

य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते ।
य एषोऽन्तरक्षिणि पुरुषो दृश्यते ।
योऽसावसौ पुरुषः सोऽहमस्मि ।
ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासनसंनिविष्टः ।
केयूरवान्मकरकुंडलवान् किरीटी
हारी हिरण्मयवपुर्धृतशंखचक्रः ॥
तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ।
आत्मानमुपासीताजरममृतमभयमशोकमनन्तम् ।
सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत ।

आप्रयाणात्तत्रापि हि दृष्टम् ।

ऊर्ध्वं प्राणमुन्नयत्यपानं प्रत्यगस्यति ।
मध्ये वामनमासीनं विश्वेदेवा उपासते ॥
हृद्यपेक्षया तु मनुष्याधिकारत्वात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये संनिविष्टः

अङ्गुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ।
ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥
अङ्गुष्ठमात्रमात्मानमधूमज्योतिरूपकम् ।
प्रकाशयन्तमन्तःस्थं ध्यायेत्कूटस्थमव्ययम् ॥
विज्ञेयोऽक्षरतन्मात्रो जीवितं वापि चञ्चलम् ।
विहाय शास्त्रजालानि यत्सत्यं तदुपास्यताम् ॥
यन्मनसा न मनुते येनाहुर्मनो मतम् ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥
यद्वाचानभ्युदितं येन वागभ्युद्यते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥
यश्चक्षुषा न पश्यति येन चक्षूंषि पश्यन्ति ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥

कम्पनात् ।

एतस्य वा अक्षरस्य प्रशासने गार्गि
सूर्याचन्द्रमसौ विधृतौ तिष्ठतः ॥
लोकानां लोकपालानां मद्भयं कल्पजीविनाम् ।
भयादस्याग्निस्तपति भयात्तपति सूर्यः ।
भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चमः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ कर्मबोधकश्रुतयः ।

नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः ।
मनः परं कारणमामनन्ति संसारचक्रं परिवर्तयेद्यत् ॥
यथा कामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति
तत्कर्म कुरुते यत्कर्म कुरुते तदभिसम्पद्यते ॥
यन्मनसा ध्यायति तद्वाचा वदति यद्वाचा वदति तत्
कर्मणा करोति यत् कर्मणा करोति तदभिसम्पद्यते ॥
साधुकारी साधुर्भवति पापकारी पापो भवति ।
एष ह्येवा साधु कर्म कारयति तं यमुन्निनीषते ।
एष एवासाधु कर्म कारयति तं यमधो निनीषते ।
वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ।
अथ य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्यंते ।
अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्यंते ॥
यः पिता स पुनः पुत्रो यः पुत्रः स पुनः पिता ।
एवं संसारचक्रेण कूपचक्रे घटा इव ॥
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।
नाऽभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥
स यदोत्क्रमिष्यन्भवति नैनं घोषं शृणोति ।
यथा सौम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते
मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि तत्तद्विषया-
न्प्राणान्संहृत्य कामकर्मान्वितम् ।
अविद्याभूतवेष्टितो जीवो देहान्तरं प्राप्य लोकान्तरं गच्छति
यो वा एतदक्षरं गार्ग्यविदित्वास्माल्लोकात्प्रैति स कृपणः।

द्रव्याणि भूमौ पशवश्च गोष्ठे
भार्या गृहद्वारि जनाः श्मशाने ।
देहश्चितायां परलोकमार्गे
कर्मानुगो गच्छति जीव एकः ॥

स्तेयं हिंसाऽनृतं दम्भः कामः क्रोधः स्मयो मदः ।
भेदो वैरमविश्वासः संस्पर्धा व्यसनानि च ॥
न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्
अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे
नृदेहमाद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं गुरुकर्णधारम् ।
मयानुकूलेन नभस्वतेरितं पुमान्भवाब्धिं न तरेत्स आत्महा
असुर्या नाम ते लोका अन्धेन तमसावृताः ।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥
कर्णधारं गुरुं प्राप्य तद्वाक्यं प्लववद्दृढम् ।
अभ्यासवासनाशक्त्या तरन्ति भवसागरम् ॥
अधीत्य चतुरो वेदान्सर्वशास्त्राण्यनेकशः ।
ब्रह्मतत्त्वं न जानाति दर्वी पाकरसं यथा ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अनुभूतिं विना मूढो वृथा ब्रह्मणि मोदते ।
प्रतिविम्बितशाखाग्रफलास्वादनमोदवत् ॥
योऽन्यथा संतमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥
यश्च मूढतमो लोके यश्च बुद्धेः परं गतः ।
तावुभौ सुखमेधेते क्लिश्यत्यन्तरितो जनः ॥
पंडितास्तु कलत्रेण रमन्ते महिषा इव ।
पुत्रस्योत्पादने दक्षा अदक्षा मुक्तिसाधने ॥
अविद्यायामन्तरे वर्तमानाः स्वयं धीराः पण्डितंमन्यमानाः ।
दन्द्रम्यमाणाः परियन्ति मूढा अन्धेनैव नीयमाना यथान्धाः॥
विप्रैर्भागवती वार्ता गेहे गेहे जने जने ।
कारिता कणलोभेन कथासारस्ततो गतः ॥
कामक्रोधमहालोभतृष्णाव्याकुलचेतसः ।
तेपि तिष्ठंति तपसि तपः सारस्ततो गतः ॥
मनसश्चाजयाल्लोभाद्दम्भात्पाषण्डसंश्रयात् ।
शास्त्रानभ्यसनाच्चैव ध्यानयोगफलं गतम् ॥
अत्युग्रभूरिकर्माणो नास्तिका रौरवा जनाः ।
तेपि तिष्ठन्ति तीर्थेषु तीर्थसारस्ततो गतः ॥
न योगी नैव सिद्धो वा न ज्ञानी सत्क्रियो नरः ।
कलिदावानलेनाद्य साधनं भस्मतां गतम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सत्यं नास्ति तपः शौचं दया दानं न विद्यते ।
नेह यत्कर्म धर्माय न विरागाय कल्पते ॥
अयं तु युगधर्मो हि वर्तते कस्य दूषणम् ॥
सत्यं वद धर्मं चर । यतो धर्मस्ततो जयः ।
अनित्यानि शरीराणि विभवो नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः कर्तव्यो धर्मसंग्रहः ॥
नामुत्र हि सहायार्थं पिता माता च तिष्ठति ।
न पुत्रदारा न ज्ञातिर्धर्मस्तिष्ठति केवलम् ॥
नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥
जीवो जीवस्य जीवनम् ।
मुनिधर्मे स्थितो वापि राजधर्मरतोपि वा ।
जीवरक्षणमेवादौ कुर्यात्सर्वत्र धर्मवित् ॥
अभयं सर्वभूतेभ्यो यो ददाति नराधिप ।
तस्यापि सर्वभूतेभ्यो न भयं विद्यते क्वचित् ॥
शान्तितुल्यं तपो नास्ति न संतोषात्परं सुखम् ।
न तृष्णायाः परो व्याधिर्न च धर्मो दयापरः ॥
धृतिः क्षमा दमस्तेयं शौचमिन्द्रियनिग्रहः ।
ह्रीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥
त्रयो धर्मस्कंधा यज्ञोऽध्ययनं दानमिति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यज्ञो वै विष्णुः ।

अध्यापनं ब्रह्मयज्ञः पितृयज्ञश्च तर्पणम् ।
होमो दैवो बलिर्भूतो नृयज्ञोऽतिथिपूजनम् ॥
ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गंतव्यं ब्रह्मकर्म समाधिना ॥
दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥
शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् ।
मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयास्त्विमाः ॥
सुपात्रं लभते यत्र संकल्पश्च यदा भवेत् ।
तत्रैव दानं कर्तव्यं देशं कालं न चिंतयेत् ॥
दानेन वर्धते लक्ष्मीर्विद्या दानेन वर्धते ।
दानेन वर्धते धर्मः कीर्तिर्दानेन वर्धते ॥
दानेन पाणिर्न तु कङ्कणेन स्नानेन शुद्धिर्न तु चन्दनेन ।
मानेन तृप्तिर्न तु भोजनेन ज्ञानेन मुक्तिर्न तु मुण्डनेन ॥
स्वर्गस्थितानामिह जीवलोके चत्वारि चिह्नानि वसंति देहे ।
दानप्रसंगो मधुरा च वाणी देवार्चनं ब्राह्मणतर्पणं च ॥
स्वदत्तां परदत्तां वा ब्रह्मवृत्तिं हरेच्च यः ।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ॥
सत्यं स्वर्गस्य सोपानं सत्यं ब्रह्मपदप्रदम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सत्येन लभते मोक्षं सत्ये सर्वं प्रतिष्ठितम् ॥
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥
सर्वकार्येषु सर्वत्र सत्यं ब्रह्म सनातनम् ।
नास्ति सत्यसमं पुण्यं नानृतात्पातकं परम् ॥
वने निवासः कंदादि भोजनं वल्कलांबरम् ।
समस्तविषयत्यागस्तपः परममुच्यते ॥
ग्रीष्मे पञ्चाग्नितपनं वर्षायां वृष्टिधारणम् ।
शीते जलप्रवेशश्च तपः परममुच्यते ॥
तपसा हि ध्रुवो लेभे विष्णोर्दर्शनमुत्तमम् ।
राज्यं च विपुलं लोके परलोके परां गतिम् ॥
भिक्षोर्धर्मः शमोऽहिंसा तप इज्या वनौकसः ।
गृहिणो भूतरक्षेज्या द्विजस्याचार्यसेवनम् ॥
अहिंसा सत्यमस्तेयमकामक्रोधलोभता ।
भूतप्रियहितेहा च धर्मोऽयं सार्ववर्णिकः ॥
यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥
ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥
तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥
अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥
यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥
उप समीपे यो वासो जीवात्मपरमात्मनोः ।
उपवासः स विज्ञेयो न तु कामस्य शोषणम् ॥
कर्षयन्तःशरीरस्थं भूतग्राममचेतसः ।
मां चैवान्तःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥
येषां न विद्या न तपो न दानं न चापि शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूता मनुष्यरूपेण मृगाश्चरन्ति ॥
न विप्रपादोदककर्दमानि न वेदशास्त्रध्वनिगर्जितानि ।
स्वाहास्वधाकारविवर्जितानि स्मशानतुल्यानि गृहाणि तानि ॥
उत्तमस्य क्षणं कोपो मध्यमे घटिका द्वयम् ।
अधमे दिनमेकं तु यावज्जीवं दुरात्मनः ॥
अत्यंतकोपः कटुका च वाणी दरिद्रता च स्वजनेषु वैरम् ।
नीचप्रसंगः कुलहीनसेवा चिह्नानि देहे नरकस्थितानाम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ संन्यासबोधकश्रुतयः ।

अपुण्यपुण्योपरमे यं पुनर्भवनिर्भयाः ।
शान्ताः संन्यासिनो यांति तस्मै मोक्षात्मने नमः ॥
शंकरं शंकराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः ॥
द्वे रूपे वासुदेवस्य चलं चाचलमेव च ।
चलं संन्यासिनो रूपमचलं प्रतिमादिकम् ॥
देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा च दंडिनम् ।
प्रणिपातमकुर्वाणो रौरवं नरकं व्रजेत् ॥
सर्वं ब्रह्मेति यो वेद ब्रह्मचारी स उच्यते ।
ब्रह्मचर्यं समाप्य गृही भवेत् गृहाद्वनी भूत्वा प्रव्रजे
ॐ भूः सन्यस्तं मया । ॐ भुवः सन्यस्तं मया ।
ॐ सुवः सन्यस्तं मया । ॐ भूर्भुवः सुवः सन्यस्तं मयो
यदा तु विदितं तत्त्वं परं ब्रह्म सनातनम् ।
तदैकदण्डं संगृह्य सोपवीतां शिखां त्यजेत् ॥
शिवं तुरीयं यज्ञोपवीतम् ।
यदक्षरं परं ब्रह्म तत्सूत्रमिति धारयेत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

येन सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।
तत्सूत्रं धारयेद्योगी योगवित्तत्त्वदर्शिवान् ॥
शिखा ज्ञानमयी यस्य उपवीतं च तन्मयम् ।
ब्राह्मण्यं सकलं तस्य इति वेदानुशासनम् ॥
अभयं सर्वभूतेभ्यो दत्त्वा चरति यो मुनिः ।
न तस्य सर्वभूतेभ्यो भयमुत्पद्यते क्वचित् ॥
निर्वैरेण समं पश्यन्द्विजगोश्वमृगादिषु ।
भावयन्मनसा विष्णुं परमात्मानमीश्वरम् ॥
अभेददर्शनं ज्ञानं ध्यानं निर्विषयं मनः ।
स्नानं मनोमलत्यागः शौचमिन्द्रियनिग्रहः ॥
यतिश्चरेन्महीमेतां निःसङ्गः संयतेन्द्रियः ।
आत्मक्रीड आत्मरतिरात्मवान्समदर्शनः ॥
भैक्षाशनं च मौनित्वं तपोध्यानविशेषतः ।
सम्यग्ज्ञानं च वैराग्यं धर्मोऽयं भिक्षुके मतः ॥
माधूकरमसंक्लृप्तं प्राक्प्रणीतमयाचितम् ।
तात्कालिकं चोपपन्नं भैक्षं पञ्चविधं स्मृतम् ॥
यताहारो जितक्रोधो जितसङ्गो जितेन्द्रियः ।
निर्द्वन्द्वो निरहंकारो निराशीरपरिग्रहः ॥
वेदान्ताभ्यासनिरतः शान्तो दान्तो जितेन्द्रियः ।
निर्भयो निर्ममो नित्यो निर्द्वन्द्वो निष्परिग्रहः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न पाणिपादचपलो न नेत्रचपलो यतिः ।
न च वाक्चपलश्चैव ब्रह्मभूतो जितेन्द्रियः ॥
वैराग्यस्य फलं बोधो बोधस्योपरतिः फलम् ।
स्वानन्दानुभवाच्छांतिरेषैवोपरतेः फलम् ॥
प्रपञ्चमखिलं यस्तु ज्ञानाग्नौ जुहुयाद्यतिः ।
आत्मनि स्वप्रकाशाग्नौ चित्तमेकाहुतिं क्षिपेत् ।
अग्निहोत्री स विज्ञेय इतरे नामधारकः ॥
रथ्यायां बहुवस्त्राणि भिक्षा सर्वत्र लभ्यते ।
भूमिः शय्यास्ति विस्तीर्णा यतयः केन दुःखिताः ॥
काषायवासाः सततं ध्यानयोगपरायणः ।
ग्रामान्ते वृक्षमूले वा वसेद्देवालयेऽपि वा ॥
अनारम्भेऽपि परगृहे सुखी सर्पवत् ।
शून्यागारदेवगृहतृणकूटवल्मीकवृक्षमूल
कुलालशालाग्निहोत्रशालानदीपुलिन-
गिरिकन्दरकुहरकोटरनिर्झरस्थण्डिले ।
एकमेवाद्वितीयं यद्गुरोर्वाक्येन निश्चितम् ।
एतदेकान्तमित्युक्तं न मठो न वनान्तरम् ॥
वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि ।
कुमारीकङ्कणवत् ।
संगी हि बाध्यते लोके निःसंगः सुखमश्नुते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेन संगः परित्यज्यः सर्वदा सुखमिच्छता ॥
सुरमंदिरतरुमूलनिवासः शय्या भूतलमजिनं वासः ।
सर्वपरिग्रहभोगत्यागः कस्य सुखं न करोति विरागः ॥
भोगे रोगभयं कुले च्युतिभयं वित्ते नृपालाद्भयम्
मौने दैन्यभयं बले रिपुभयं रूपे जराया भयम् ।
शास्त्रे वादभयं गुणे खलभयं काये कृतान्ताद्भयम्
सर्वं वस्तु भयान्वितं भुवि नृणां वैराग्यमेवाभयम् ॥
न तत्सुखं सुरेंद्रस्य न सुखं चक्रवर्तिनाम् ।
यत्सुखं वीतरागस्य मुनेरेकांतवासिनः ॥
रसं ब्रह्म पिबेद्यश्च तृप्तो यः परमात्मनि ।
इंद्रं च मन्यते रंकं नृपाणां तत्र का कथा ॥
कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥
अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ॥
कर्माऽशुक्लाऽकृष्णं योगिनस्त्रिविधमितरेषाम् ।
स यतिर्भूत्वा त्रिदण्डी द्वारकामगात् ।
वाग्दण्डः कर्मदण्डश्च मनोदण्डश्च ते त्रयः ।
यस्यैते नियता दण्डाः स त्रिदण्डी महायतिः ॥
वाग्दण्डे मौनमातिष्ठेत्कायदण्डे त्वभोजनम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मानसे तु कृते दण्डे प्राणायामो विधीयते ॥
त्रिदण्डं वैष्णवं लिङ्गं विप्राणां मुक्तिसाधनम् ।
निर्वाणं सर्वधर्माणामिति वेदानुशासनम् ॥
विष्णुक्रीडा विष्णुरतयो विमुक्ता
विष्ण्वात्मका विष्णुमेवापियन्ति ॥
कर्मत्यागान्न संन्यासो न प्रेषोच्चारणेन तु ।
संधौ जीवात्मनोरैक्यं संन्यासः परिकीर्तितः ॥
देहन्यासो हि संन्यासो नैवकाषायवाससा ।
नाहं देहो महात्मेति निश्चयो ज्ञानलक्षणम् ॥
विजानन्ति महावाक्यं गुरोश्चरणसेवया ।
ते वै संन्यासिनः प्रोक्ता इतरे वेषधारिणः ॥
सत्कारमानपूजार्थं दण्डकाषायधारणः ।
स संन्यासी न वक्तव्यः संन्यासी ज्ञानतत्परः ॥
यो भवेत्पूर्वसंन्यासी तुल्यो वै धर्मतो यदि ।
तस्मै प्रणामः कर्तव्यो नेतराय कदाचन ॥
निर्द्वन्द्वो नित्यसत्त्वस्थः सर्वत्र समदर्शनः ।
तुरीयः परमो हंसः साक्षान्नारायणो यतिः ॥
कौपीनयुगलं कन्था दण्ड एकः परिग्रहः ।
यतेः परमहंसस्य नाधिकं तु विधीयते ॥
सर्वान्कामान्परित्यज्य अद्वैते परमे स्थितिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानदण्डो धृतो येन एकदण्डी स उच्यते ॥
दत्तात्रेय हरे कृष्ण उन्मत्तानन्ददायक ।
दिगम्बर मुने बाल पिशाच ज्ञानसागर ॥
दत्तात्रेयं शिवं शान्तमिन्द्रनीलनिभं प्रभुम् ।
आत्ममायारतं देवमवधूतं दिगम्बरम् ॥
वृक्षमूले शून्यगृहे श्मशानवासिनो वासाम्बरा वा
दिगम्बरा वा न तेषां धर्माधर्मौ लाभालाभौ ॥
शुद्धाशुद्धौ द्वैतवर्जिता समलोष्टाश्मकाञ्चनाः
सर्ववर्णेषु भैक्षाचरणं कृत्वा सर्वत्रात्मैवेति पश्यन्ति ॥
अथ जातरूपधरा निर्द्वन्द्वा निष्परिग्रहाः ।
शुक्लध्यानपरायणा आत्मनिष्ठाः प्राणसंधारणार्थं
यथोक्तकाले भैक्षमाचरन्तः ।
यत्फलं लभते मर्त्यः कोटिब्राह्मणभोजनैः ।
तत्फलं समवाप्नोति ज्ञानिनं यस्तु भोजयेत् ॥
सर्वधर्मान्परित्यज्य निर्ममो निरहंकारो भूत्वा
ब्रह्मिष्ठं शरणमुपगम्य तत्त्वमसि अहं ब्रह्मास्मि
सर्वं खल्विदं ब्रह्म नेह नानास्ति किंचनेत्यादि
महावाक्यार्थानुभवज्ञानाद्ब्रह्मैवाहमस्मीति
निश्चित्य निर्विकल्पसमाधिना स्वतन्त्रो
यतिश्चरति स संन्यासी स मुक्तः स पूज्यः

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

(स योगी स परमहंसः सोऽवधूतः स ब्राह्मण इति।
गृहाश्रमो जघनतो ब्रह्मचर्यं हृदो मम ।
वक्षःस्थानाद्वने वासो न्यासः शीर्षणि संस्थितः ॥

अथ संग्रहश्रुतयः ।

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥
नमस्ते शारदादेवि काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं विद्यादानं च देहि मे ॥

मूले मूलाभावादमूलं मूलम् ।

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः ।
तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ॥

अधिकं तु भेदनिर्देशात् ।

सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे
एकस्तयोः खादति पिप्पलान्नमन्यो निरन्नोऽपि बलेन भूयान्
द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति ॥
समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः ।
जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥

तन्निवृत्तिरीश्वरप्रसादात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

यदा पश्यः पश्यते रुक्मवर्णम्
कर्तारमीशं पुरुषं ब्रह्मयोनिम् ।
तदा विद्वान्पुण्यपापे विधूय
निरञ्जनः परमं साम्यमुपैति ॥
मुक्तोपसृप्यव्यपदेशात् ।
गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ।
ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे ।
छाया तपौ ब्रह्मविदो वदन्ति ।
हरिर्दाता हरिर्भोक्ता हरिरन्नं प्रजापतिः ।
हरिर्विप्रशरीरस्थो भुङ्क्ते भोजयते हरिः ॥
न वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति
न वा वाचं व्याकरोति येन वा स्वादुचाऽस्वादु च विजानाति ॥
संभोगप्राप्तिरितिचेन्न वैशेष्यात् ।
प्रकाशादिवन्नैवं परः ।
शब्दमस्पर्शमरूपमव्ययं तथाऽरसं नित्यमगन्धवच्च यत् ।
अनाद्यनन्तं महतः परं ध्रुवं निचाय्य तन्मृत्युमुखात्प्रमुच्यते ॥
यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः ।
मृत्युर्यस्योपसेचनं क इत्था वेद यत्र सः ॥
अत्ता चराचरग्रहणात् ।
जगदात्मतया भाति यदा भोज्यं भवेत्तदा ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ब्रह्म स्वात्मतया नित्यं भक्षितं सकलं तदा ॥
न वै देवा अश्नंति न पिबन्त्येतदेवामृतं दृष्ट्वा तृप्तं
कर्ता शास्त्रार्थवत्वात् ।
एष हि द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता
मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः ॥
अहंकारः कर्ता न पुरुषः ।
अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ॥
तत्रैवं सति कर्तारमात्मानं केवलं तु यः ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥
अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥
नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥
यथा च तक्षोभयथा ।
ध्यायतीव लेलायतीव ।
यत्र सुप्तो न कंचन कामं कामयते ।
न कंचन स्वप्नं पश्यति तत्सुषुप्तम् ॥
य एषोऽन्तर्हृदय आकाशस्तस्मिंच्छेते ।
सता सोम्य तदा संपन्नो भवति ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अथ प्रबोधोऽस्मात् ।

चतुर्युगसहस्राणि ब्रह्मणो दिवा भवति ।
तावता कालेन पुनस्तस्य रात्रिर्भवति ॥
यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयात्तस्मिन्स्वप्नेषु पश्यति ॥
मातृदेवो पितृदेवो आचार्यदेवो अतिथिदेवो भव ।
अथ ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं प्राणादिपञ्चकम् ।
वियदादिपञ्चकमन्तःकरणचतुष्टयकामकर्मतमांस्यष्टपुरम् ॥
मातापित्रोर्मलोद्भूतं मलमांसमयं वपुः ।
त्यक्त्वा चण्डालवद्दूरं ब्रह्मभूय कृती भव ॥
स्वप्रकाशमधिष्ठानं स्वयं भूय सदात्मना ।
ब्रह्माण्डमपि पिण्डाण्डं त्यज्यतां मलभाण्डवत् ॥
सर्वानिंद्रियकृतान्दोषान्वारयतीति तेन वरणा भवति ।
सर्वानिंद्रियकृतान्पापान्नाशयतीति तेन नाशी भवति ॥
भ्रुवोर्घ्राणस्य च यः सन्धिः स एष
द्यौर्लोकस्य परस्य च संधिर्भवति ।
एतद्वै संधिं संध्यां ब्रह्मविद उपासते ।
अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।
परोपकारः पुण्याय पापाय परपीडनम् ॥
मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः॥
जन्मादिव्यवस्थातः पुरुषबहुत्वम् ।
पितापुत्रवदुभयोर्दृष्टत्वात्
समानं जरामरणादिजं दुःखम् ।
अकर्तुरपि फलोपभोगोऽन्नाद्यवत् ।
दोषबोधेऽपि नोपसर्पणं प्रधानस्य कुलवधूवत् ।
वामदेवादिर्मुक्तो नाद्वैतम् । विमुक्तिप्रशंसा मंदानाम्।
स नित्यमुक्तोऽसंगत्वात् । पिशाचवदन्यार्थोपदेशोऽपि
नाभासमात्रमपि मलिनदर्पणवत् ।
असाधनानुचिन्तनं बन्धाय भरतवत् ।
तद्विस्मरणेऽपि भेकीवत् ।
कृतनियमलंघनादानर्थक्यं लोकवत् ।
अंतःकरणधर्मत्वं धर्मादीनाम् ।
यावदधिकारमवस्थितिराधिकारिकाणाम् ।
उभयव्यपदेशात्त्वहिकुण्डलवत् ।
प्रकाशाश्रयवद्वा तेजस्त्वात् ।
स्थानविशेषात्प्रकाशादिवत् ।

अथ शिवस्वरूपबोधकश्रुतयः ।

स जयति सिंधुरवदनो देवो यत्पादपंकजस्मरणम्
वासरमणिरिव तमसां राशीन्नाशयति विघ्नानाम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

वंदे बोधमयं नित्यं गुरुं शंकररूपिणम् ।
यमाश्रितो हि वक्रोपि चन्द्रः सर्वत्र वन्द्यते ॥
वन्दे शंभुमुमापतिं सुरगुरुं वंदे जगत्कारणम्
वन्दे पन्नगभूषणं मृगधरं वंदे पशूनां पतिम् ।
वन्दे सूर्यशशांकवह्निनयनं वंदे मुकुंदप्रियम्
वन्दे भक्तजनाश्रयं च वरदं वंदे शिवं शंकरम् ॥
भवानीशंकरौ वन्दे श्रद्धाविश्वासरूपिणौ ।
याभ्यां विना न पश्यंति सिद्धाः स्वान्तस्थमीश्वरम् ॥

कर्पूरगौरं करुणावतारम्
संसारसारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविंदे
भवं भवानीसहितं नमामि ॥

कुंदइंदुदरगौरसुंदरं अंबिकापतिमभीष्टमंदिरम् ।
कारुणीककलकंजलोचनं नौमि शंकरमनंगमोचनम् ॥

हृत्पुण्डरीकान्तरसन्निविष्टम्
स्वतेजसा व्याप्तनभोवकाशम् ।
अतीन्द्रियं सूक्ष्ममनंतमाद्यम्
ध्यायेत्परानन्दमयं महेशम् ॥
हृत्पुण्डरीकं विरजं विशुद्धम्
विचिन्त्य मध्ये विशदं विशोकम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

उमासहायं परमेश्वरं प्रभुम्
त्रिलोचनं नीलकण्ठं प्रशान्तम् ॥
ध्यात्वा मुनिर्गच्छति भूतयोनिम्
समस्तसाक्षिं तमसः परस्तात् ॥
अचिन्त्यरूपमव्यक्तमनन्तममृतं शिवम् ।
आदिमध्यान्तरहितं प्रशान्तं ब्रह्मकारणम् ॥
बिंदुरूपं महादेवं व्योमाकारं सदाशिवम् ।
शुद्धस्फटिकसंकाशं धृतबालेन्दुमौलिनम् ॥
शिवो गुरुः शिवो वेदः शिवो देवः शिवः प्रभुः ।
शिवोस्म्यहं शिवः सर्वं शिवादन्यन्न किंचन ॥
ब्रह्मणो हृदयस्थानं कण्ठे विष्णुः समाश्रितः ।
तालुमध्ये स्थितो रुद्रो ललाटस्थो महेश्वरः ॥
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येन विप्रेण शिरसि त्रिपुण्ड्रं भस्मना धृतम् ॥
त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते ।
धारयन्ति च ये भक्त्या धारयन्ति शिवं च ते ॥
धिग्भस्मरहितं फालं धिग्ग्राममशिवालयम् ।
धिगनीशार्चनं जन्म धिग्विद्यामशिवाश्रयाम् ॥
एकवक्त्रं तु रुद्राक्षं परतत्त्वस्वरूपकम् ।
तद्धारणात्परे तत्त्वे लीयते विजितेन्द्रियः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जलपाषाणमृत्काष्ठवास्याकुद्दालकादयः ।
ईश्वराः सर्व एवैते पूजिताः फलदायिनः ॥
न काष्ठे विद्यते देवो न पाषाणे न मृण्मये ।
भावे हि विद्यते देवस्तस्माद्भावो हि कारणम् ॥
तीर्थानि तोयपूर्णानि देवान्काष्ठादिनिर्मितान् ।
योगिनो न प्रपूज्यन्ते स्वात्मप्रत्ययकारणात् ॥
यथा यथोपासते तं फलमीयुस्तथा तथा ।
फलोत्कर्षापकर्षौ तु पूज्यपूजानुसारतः ॥
पाषाणलोहमणिमृण्मयविग्रहेषु
पूजा पुनर्जननभोगकरी मुमुक्षोः ।
तस्माद्यतिः स्वहृदयार्चनमेव कुर्या-
द्बाह्यार्चनं परिहरेदपुनर्भवाय ॥
देहो देवालयः प्रोक्तः स जीवः केवलः शिवः ।
त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन पूजयेत् ॥
शिवमात्मनि पश्यन्ति प्रतिमासु न योगिनः ।
अज्ञानां भावनार्थाय प्रतिमाः परिकल्पिताः ॥
आत्मपूजासमा नास्ति पूजा रघुकुलोद्भव ।
मत्सायुज्यमवाप्नोति चाण्डालोप्यात्मपूजया ॥
सर्वभूतस्थितं देवं सर्वेशं नित्यमर्चयेत् ।
आत्मरूपं तमालोक्य ज्ञानरूपं निरामयम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वभूतेषु चाऽत्मानं सर्वभूतानि चाऽऽत्मनि ।
समं पश्यन्नात्मयाजी स्वाराज्यमधिगच्छति ॥
देहो देवालयः प्रोक्तो देही देवो निरञ्जनः ।
अर्चितः सर्वभावेन स्वानुभूत्या विराजते ॥
अंतस्थं मां परित्यज्य बहिष्टं यस्तु सेवते ।
हस्तस्थं पिण्डमुत्सृत्य लिहेत्कूर्परमात्मनः ॥
आत्मा त्वं गिरिजा मतिः सहचराः प्राणाः शरीरं
पूजा ते विषयोपभोगरचना निद्रा समाधिस्थितिः।
संचारः पदयोः प्रदक्षिणविधिः स्तोत्राणि सर्वा गि
यद्यत्कर्म करोमि तत्तदखिलं शंभो तवाराधनम् ॥

करचरणकृतं वाक्कायजं कर्मजं वा
श्रवणनयनजं वा मानसं वाऽपराधम् ।
विहितमविहितं वा सर्वमेतत्क्षमस्व
जय जय करुणाब्धे श्रीमहादेव शंभो ॥
न जनको जननी न च सोदरो
न तनयो न च भूरिबलं कुलम् ।
अवति कोऽपि न कालवशं गतम्
भजत रे मनुजा गिरिजापतिम् ॥

कैलासाचलकंदरालयकरी गौरी उमा शंकरी
कौमारी निगमार्थगोचरकरी ओंकारबीजाक्षरी ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मोक्षद्वारकपाटपाटनकरी काशीपुराधीश्वरी
भिक्षां देहि कृपावलंबनकरी मातान्नपूर्णेश्वरी ॥
स्फटिकरजतवर्णं मौक्तिकीमक्षमाला-
ममृतकलशविद्यां ज्ञानमुद्रां कराग्रे ।
दधतमुरगकक्ष्यं चन्द्रचूडं त्रिनेत्रं
विधृतविविधभूषं दक्षिणामूर्तिमीडे ॥
असितगिरिसमं स्यात्कज्जलं सिंधुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालम्
तदपि तव गुणानामीश पारं न याति ॥
तीर्थे तीर्थे निर्मलं ब्रह्मवृंदम्
वृंदे वृंदे तत्त्वचिंतानुवादः ।
वादे वादे जायते तत्त्वबोधो
बोधे बोधे भासते चन्द्रचूडः ॥
महेश्वरे वा जगतामधीश्वरे
जनार्दने वा जगदन्तरात्मनि ।
न वस्तुभेदप्रतिपत्तिरस्ति मे
तथापि भक्तिस्तरुणेंदुशेखरे ॥
त्वत्पादयुगले शंभो भक्तिरस्तु सदा मम ।
यथा शिवमयो विष्णुरेवं विष्णुमयः शिवः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः ॥
यो विष्णुः स शिवः प्रोक्तो यः शिवो विष्णुरेवसः
एकमेव स्वरूपं तु द्विविधं परिदृश्यते ॥
एको देवः केशवो वा शिवो वा ।
ये नमस्यन्ति गोविंदं ते नमस्यन्ति शंकरम् ।
येऽर्चयन्ति हरिं भक्त्या तेऽर्चयन्ति वृषध्वजम् ॥
ये द्विषन्ति विरूपाक्षं ते द्विषन्ति जनार्दनम् ।
ये रुद्रं नाभिजानन्ति ते न जानन्ति केशवम् ॥
अन्तरात्मा भवेद्ब्रह्मा परमात्मा महेश्वरः ।
सर्वेषामेव भूतानां विष्णुरात्मा सनातनः ॥
स ब्रह्मा स शिवः सेन्द्रः सोक्षरः परमःस्वराट् ।
स एव विष्णुः स प्राणः स कालोऽग्निः स चन्द्रमाः

अथ श्रीविष्णुस्वरूपबोधकश्रुतयः ।

मांगल्यं मंगलं विष्णुं वरेण्यमनघं शुचिम् ।
नमस्कृत्य हृषीकेशं चराचरगुरुं हरिम् ॥
शान्ताकारं भुजगशयनं पद्मनाभं सुरेशम्
विश्वाधारं गगनसदृशं मेघवर्णं शुभांगम् ।
लक्ष्मीकान्तं कमलनयनं योगिभिर्ध्यानगम्यम्
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सशङ्खचक्रं सकिरीटकुण्डलम्
सपीतवस्त्रं सरसीरुहेक्षणम् ।
सहारवक्षःस्थलकौस्तुभश्रियम्
नमामि विष्णुं शिरसा चतुर्भुजम् ॥

विष्णोर्मुखत्वं सत्त्वमयत्वात् ।
नित्यं सत्त्वगुणोपेतंपरानन्दमयं सदा ।
वैकुण्ठं परमं धाम विष्णोर्विशति भास्वरम् ॥

अरूपवदेव हि तत्प्रधानत्वात् ।
रूपं यत्तत्प्राहुरव्यक्तमाद्यम्
ब्रह्मज्योतिर्निर्गुणं निर्विकारम् ।
सत्तामात्रं निर्विशेषं निरीहम्
स त्वं साक्षाद्विष्णुरध्यात्मदीपः ॥

जले विष्णुः स्थले विष्णुर्विष्णुः पर्वतमस्तके ।
ज्वालमालाकुले विष्णुः सर्वं विष्णुमयं जगत् ॥
यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेपि वा ।
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥
निःश्वासभूता मे विष्णोर्वेदा जाताः सुविस्तराः ।

ॐनारायणाय विद्महे वासुदेवाय
धीमहि तन्नो विष्णुः प्रचोदयात् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ महालक्ष्मी च विद्महे सर्वसिद्धिश्च
धीमहि तन्नो देवी प्रचोदयात् ।
माता च कमलादेवी पितादेवो जनार्दनः ।
बांधवा विष्णुभक्ताश्च स्वदेशो भुवनत्रयम् ॥
कराग्रे वसते लक्ष्मीः करमध्ये सरस्वती ।
करमूले तु गोविंदः प्रभाते करदर्शनम् ॥
गोपीचन्दन पापघ्न विष्णुदेहसमुद्भव ।
चक्राङ्कित नमस्तुभ्यं धारणान्मुक्तिदो भव ॥
अनाद्यं तत्परं ब्रह्म न देवा नर्षयो विदुः ।
एकोऽयं भगवान्देवो धाता नारायणो हरिः ॥
निर्गुणं निष्क्रियं निर्मलम्
निरवद्यं निरञ्जनं निराकारम् ।
निराश्रयं निरतिशयाद्वैत-
परमानन्दलक्षणमादिनारायणम् ॥
स एष सर्वभूतान्तरात्मापहतपाप्मा
दिव्यो देव एको नारायणः ।
शुद्धो देव एको नारायणो न द्वितीयोऽस्ति कश्चित् ।
य एवं वेद स विष्णुरेव भवति स विष्णुरेव भवति
सर्वभूतस्थमेकं वै नारायणं कारणपुरुषमकारणं परं ब्र

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ॐ नमो नारायणायेति तारकम्
चिदात्मकमित्युपासितव्यम् ।
ॐ नमो नारायणायेति मन्त्रोपासको
वैकुण्ठभुवनं गमिष्यति ।
ॐ नमो नारायणायेति ये विदुर्ब्रह्म शाश्वतम् ।
अंतकाले जपाद्यांति तद्विष्णोः परमं पदम् ॥
आचारहीनोऽपि मुनिप्रवीरो
भक्त्या विहीनोऽपि विनिंदितोऽपि ।
किं तस्य नारायणशब्दमात्रतो
विमुक्तपापो विशतेऽच्युतां गतिम् ॥
नारायणपरं ब्रह्म तत्त्वं नारायणः परः ।
नारायणपरो ध्याता ध्यानं नारायणः परः ॥
क्वचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतम् ।
चतुर्भुजं कंजरथांगशंखगदाधरं धारणया स्मरंति ॥
प्रसन्नवक्त्रं नलिनायतेक्षणं कदंबकिंजल्कपिशंगवाससम् ।
लसन्महारत्नहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंडलम् ॥
प्रबुद्धहृत्पंकजकर्णिकालये योगेश्वरास्थापितपादपल्लवम् ।
श्रीलक्ष्मणं कौस्तुभरत्नकंधरमम्लानलक्ष्म्या वनमालयाचितम् ॥
शोभूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ।
स्निग्धामलाकुंचितनीलकुंतलैर्विरोचमाननहासपेशलम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अदीनलीलाहसितेक्षणोल्लसद्भ्रूभगसंसूचितभूर्यनुग्रहम् ।
ईक्षेत चिंतामयमेनमीश्वरं यावन्मनो धारणयावतिष्ठते
ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥

नमामि नारायणपादपंकजम्
करोमि नाराणपूजनं सदा ।
वदामि नारायणनाम निर्मलम्
स्मरामि नारायणतत्त्वमव्ययम् ॥
नमामि त्वाऽनन्तशक्तिं परेशम्
सर्वात्मानं केवलं ज्ञप्तिमात्रम् ।
विश्वोत्पत्तिस्थानसंरोधहेतुं
यत्तद्ब्रह्म ब्रह्मलिंगं प्रशांतम् ॥

परं पराणां परमं पवित्रं परेशमीशं सुरलोकनाथम् ।
सुरासुरैरर्चितपादपद्मं सनातनं लोकगुरुं नमामि ॥

नमस्ते नमस्ते विभो विश्वमूर्ते
नमस्ते नमस्ते चिदानन्दमूर्ते ।
नमस्ते नमस्ते तपोयोगगम्य
नमस्ते नमस्ते श्रुतिज्ञानगम्य ॥

एकस्त्वमात्मा पुरुषः पुराणः सत्यः स्वयंज्योतिरनंत आद्य
नित्योक्षरोऽजस्रसुखो निरञ्जनः पूर्णोऽद्वयो मुक्त उपाधितोऽ

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

म् । त्रज्ञ आत्मा पुरुषः पुराणः साक्षात्स्वयंज्योतिरजः परेशः ।
ष्ठते ारायणो भगवान्वासुदेवः स्वमाययात्मन्यवधीयमानः ॥
विं पुराणं पुरुषोत्तमोत्तमं सर्वेश्वरं सर्वदेवैरुपास्यम् ।
॥ नादिमध्यान्तमनंतमव्ययं शिवाच्युतांभोरुहगर्भभूधरम् ॥
चिन्त्यमव्यक्तमनन्तरूपं शिवं प्रशान्तममृतं ब्रह्मयोनिम् ।
मादिमध्यान्तविहीनमेकं विभुं चिदानन्दमरूपमद्भुतम् ॥

सत्योऽसि सिद्धोऽसि सनातनोऽसि
मुक्तोऽसि मोक्षोऽसि मुदामृतोऽसि ।
देवोऽसि शान्तोऽसि निरामयोऽसि
ब्रह्मोऽसि पूर्णोऽसि परात्परोऽसि ॥

वमक्षरं परमं वेदितव्यं त्वमस्य विश्वस्य परं निधानम् ।
वमव्ययः शाश्वतधर्मगोप्ता सनातनस्त्वं पुरुषो मतो मे ॥
मक्षरं ब्रह्म परं परेशमव्यक्तमाध्यात्मिकयोगगम्यम् ।
तींद्रियं सूक्ष्ममिवातिदूरमनंतमाद्यं परिपूर्णमीडे ॥
मीश्वराणां परमं महेश्वरं तं देवतानां परमं च दैवतम् ।
तिं पतीनां परमं परस्ताद्विदाम देवं भुवनेशमीड्यम् ॥

हृदयकमलमध्ये निर्विशेषं निरीहम्
हरिहरविधिवेद्यं योगिभिर्ध्यानगम्यम् ।
जननमरणभीतिभ्रंशि सच्चित्स्वरूपम्
सकलभुवनबीजं ब्रह्म चैतन्यमीडे ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

श्रियःपतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः।
पतिर्गतिश्चांधकवृष्णिसात्वतां प्रसीदतां मे भगवान्सतां पतिः॥

उत्पत्तिं च विनाशं च भूतानामागतिं गतिम्।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥

ज्ञानात्मकत्वान्न भौतिकम्।
अशरीरं शरीरस्थं समं सर्वेषु देहिषु।
पापपुण्यविनिर्मुक्ता भक्तास्त्वां पर्युपासते॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वानुसृतःस्वभावात्
करोति यद्यत्सकलं परस्मै नारायणायेति समर्पयेत्तत्॥

त्वमेव सर्वज्ञः त्वमेव सर्वशक्तिः त्वमेव सर्वाधारः।
त्वमेव सर्वस्वरूपः त्वमेव सर्वेश्वरः त्वमेव सर्वप्रवर्तकः
त्वमेव सर्वपालकः त्वमेव सर्वनिवर्तकः॥

त्वमेव सर्वं त्वमेव सर्वं त्वमेव सर्वं न किंचिदस्ति त्वद्व्यतिरिक्तं
त्वमेव मोक्षस्त्वमेव मोक्षदस्त्वमेवाखिलमोक्षसाधनम्॥
त्वद्व्यतिरिक्तं यत्किंचित्प्रतीयते तत्सर्वं बाधितमिति निश्चि

त्वं ब्रह्मा त्वं च विष्णुस्त्वं रुद्रस्त्वं प्रजापतिः।
त्वमग्निर्वरुणो वायुस्त्वमिन्द्रस्त्वं निशाकरः॥

त्वं स्त्री त्वं पुमानसि त्वं कुमार उत वा कुमारी।
त्वं जीर्णो दण्डेन वंचसि त्वं जातो भवसि विश्वतोमुखः॥
त्वमेव माता च पिता त्वमेव त्वमेव बंधुश्च सखा त्वमेव।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देवदेव ॥
त्वत्तः सर्वमिदं जातं त्वयि सर्वं प्रतिष्ठितम् ।
त्वय्येवांते लयं याति विश्वमेतच्चराचरम् ॥
तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः ।
तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः ॥
अव्यक्ताद्व्यक्तमुत्पन्नमव्यक्ताद्यः परात्परः ।
यस्मात्परतरं नास्ति तमस्मि शरणं गतः ॥
कूटस्थमव्यक्तमचिन्त्यरूपं नारायणं कारणमादिदेवम् ।
जगांतशेषं पुरुषं पुराणं तं वासुदेवं शरणं प्रपद्ये ॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
सर्वस्य प्रभुमीशानं सर्वस्य शरणं बृहत् ॥
नो सोदरो न जनको जननी न जाया
नैवात्मजो न च कुलं विपुलं बलं वा ।
संदृश्यते न किल कोपि सहायको मे
तस्मात्त्वमेव शरणं मम शंखपाणे ॥
अशुभक्षयकर्तारं फलमुक्तिप्रदायकम् ।
यदि योन्याः प्रमुच्येऽहं तत्प्रपद्ये नारायणम् ॥
अशुभक्षयकर्तारं फलमुक्तिप्रदायकम् ।
यदि योन्याः प्रमुच्येलं ध्यायेद्ब्रह्म सनातनम् ॥
अजं शाश्वतं कारणं कारणानाम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शिवं केवलं भासकं भासकानाम् ॥
तुरीयं तमः परमाद्यंतहीनम् ।
प्रपद्ये परं पावनं द्वैतहीनम् ॥

त्वमेवाहं न भेदोऽस्ति ।

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वं
सामुद्रो हि तरंगः क्वचन समुद्रो न तारंगः ॥
नैष्कैवल्यपदं देव कांक्षेऽहं ते परंतप ।
एकीभावत्वमेऽस्तु न मे जन्म भवेत्पुनः ॥
सर्ववेदेषु यत्पुण्यं सर्वतीर्थेषु यत्फलम् ।
तत्फलं समवाप्नोति स्तुत्वा देवं जनार्दनम् ॥

अथ विश्वरूपबोधकश्रुतयः ।

ॐ नमो विश्वरूपाय विश्वस्थित्यन्तहेतवे ।
विश्वेशराय विश्वाय गोविंदाय नमो नमः ॥
नमोस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥
ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशांगुलम् ॥
विश्वरूपं सहस्राक्षं सहस्रशीर्षं सहस्रचरणं विश्वतोबाहुं
विश्वात्मानमेकमद्वैतं निष्कलं निष्क्रियं शांतं शिवमक्षरम्

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् ।
विश्वं नारायणं देवमक्षरं परमं पदम् ॥
विश्वरूपधरं विष्णुं नारायणमनामयम् ।
पूर्णानन्दैकविज्ञानं परं ब्रह्मस्वरूपिणम् ॥
हरिं सहस्रशिरसं सहस्रचरणेक्षणम् ।
सहस्रबाहुमुकुटं सहस्रवदनोज्ज्वलम् ॥
विश्वोऽसि वैश्वानरो विश्वरूपं त्वया धार्यते जायमानम् ।
वैश्वानरः साधारणशब्दविशेषात् ।
अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः ।
वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूतान्तरात्मा ॥
दिग्बाहुं स्वर्गमूर्धानं भूःपादं गगनोदरम् ।
आदित्यचन्द्रनयनमनन्तं विश्वतोमुखम् ॥
द्यौश्च ते शिरसा व्याप्ता पद्भ्यां देवी वसुंधरा ।
विक्रमेण त्रयो लोकाः पुरुषोऽसि सनातनः ॥
अव्यक्तं शाश्वतं देवं प्रभवं पुरुषोत्तमम् ।
लोकनाथं सहस्राक्षमक्षरं परमं पदम् ॥
सूर्यकोटिद्युतिरथं नित्योदितमधोक्षजम् ।
हृदयाम्बुरुहासीनं ध्यायेद्वा विश्वरूपिणम् ॥
अनेकाकारखचितमनेकवदनान्वितम् ।
अनेकभुजसंयुक्तमनेकायुधमण्डितम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

नानावर्णधरं देवं शांतमुग्रमुदायुधम् ।
अनेकनयनाकीर्णं सूर्यकोटिसमप्रभम् ॥
यत्समाधौ परंज्योतिरनन्तं विश्वतोमुखम् ।
तस्मिन्दृष्टे क्रिया कर्म यातायातो न विद्यते ॥

अथ श्रीरामस्वरूपबोधकश्रुतयः ।

ॐ यो ह वै नृसिंहो देवो भगवान्यश्च
ब्रह्मा भूर्भुवः स्वस्तस्मै वै नमो नमः ।
ॐ यो ह वै श्रीरामचन्द्रः स भगवान्द्वैतपरमानन्दमात्र
यत्परं ब्रह्म भूर्भुवः सुवस्तस्मै वै नमो नमः ॥
नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयपरिपूर्णः परमात्मा
ब्रह्मैवाहं रामोऽस्मि भूर्भुवः सुवस्तस्मै नमो नमः ॥
रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरम्
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेन्द्रं सत्यसंधं दशरथतनयं श्यामलं शांतमूर्तिम्
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥
वन्दे शारदपूर्णचन्द्रवदनं वन्दे कृपाम्भोनिधिम्
वन्देशम्भुपिनाकखण्डनकरं वन्दे स्वभक्तप्रियम् ।
वन्दे लक्ष्मणसंयुतं रघुवरं भूपालचूडामणिम्
वन्दे ब्रह्म परात्परं गुणमयं श्रेयस्करं शाश्वतम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शान्तं शाश्वतमप्रमेयमनघं निर्वाणशान्तिप्रदम्
ब्रह्माशम्भुफणीन्द्रसेव्यमनिशं वेदान्तवेद्यं विभुम् ।
रामाख्यं जगदीश्वरं सुरगुरुं मायामनुष्यं हरिम्
वन्देऽहं करुणाकरं रघुवरं भूपालचूडामणिम् ॥

न पांचभौतिकं मायामात्रत्वात् ।
ध्येयं सदा परिभवघ्नमभीष्टदोहम्
तीर्थास्पदं शिवविरञ्चिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतम्
वंदे महापुरुष ते चरणारविन्दम् ॥

नीलाम्बुजं श्यामलकोमलाङ्गं सीतासमारोपितवामभागम् ।
पाणौ महासायकचारुचापं नमामि रामं रघुवंशनाथम् ॥

शान्तं सर्वगतं सूक्ष्मं परं ब्रह्म सनातनम् ।
राजीवलोचनं रामं प्रणमामि जगत्पतिम् ॥
केयूराङ्गदकङ्कणैर्मणिगणैर्विद्योतमानं सदा
रामं पार्वणचन्द्रकोटिसदृशच्छत्रेण वैराजितम् ।
हेमस्तम्भसहस्रषोडशयुते मध्ये महामण्डपे
देवेशं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥

स्फुरद्रत्नकेयूरहाराभिरामं धराभारभूतासुरानीकदावम् ।
शरच्चन्द्रवक्त्रं लसत्पद्मनेत्रं दुरावारपारं भजे राघवेशम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सान्द्रानंदपयोदसौभगतनुं पीताम्बरं सुंदरम्
पाणौ बाणशरासनं कटिलसत्तूणीरभारं वरम् ।
राजीवायतलोचनं धृतजटाजूटेन संशोभितम्
सीतालक्ष्मणसंयुतं पथि गतं रामाभिरामं भजे ॥
अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम्।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे।
तत्त्वस्वरूपं पुरुषं पुराणं स्वतेजसा पूरितविश्वमेकम् ।
राजाधिराजं रविमण्डलस्थं विश्वेश्वरं राममहं भजामि॥
निरञ्जनं निष्प्रतिमं निरीहं निराश्रयं निष्कलमप्रपंचम्।
नित्यं ध्रुवं निर्विषयस्वरूपं निरंतरं राममहं भजामि॥
केकीकण्ठाभनीलं सुरवरविलसद् विप्रपादाब्जचिह्नम्
शोभाढ्यं पीतवस्त्रं सरसिजनयनं सर्वदा सुप्रसन्नम् ।
पाणौ नाराचचापं कपिनिकरयुतं बंधुना सेव्यमानम्
नौमीड्यं जानकीशं रघुवरमनिशं पुष्पकारूढरामम् ॥
भवभयहरमेकं भानुकोटिप्रकाशम्
करधृतशरचापं कालमेघावभासम् ।
कनकरुचिरवस्त्रं रत्नवत्कुंडलाढ्यम्
कमलविशदनेत्रं सानुजं राममीडे ॥
लोकाभिरामं रणरंगधीरं राजीवनेत्रं रघुवंशनाथम् ।
कारुण्यरूपं करुणाकरं तं श्रीरामचन्द्रं शरणं प्रपद्ये ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

देहबुद्ध्या तु दासोऽहं जीवबुद्ध्या त्वदंशकः ।
ब्रह्मबुद्ध्या त्वमेवाहमिति मे निश्चला मतिः ॥

अतुलितबलधामं स्वर्णशैलाभदेहम्
दनुजवनकृशानुं ज्ञानिनामग्रगण्यम् ।
सकलगुणनिधानं वानराणामधीशम्
रघुपतिवरदूतं वातजातं नमामि ॥

अथ श्रीकृष्णस्वरूपबोधकश्रुतयः ।

ॐ सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकर्मणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
ॐ जाग्रत्स्वप्नसुषुप्तितुरीयातीतोऽन्तर्यामी गोपाल
ॐ तत्सद्भूर्भुवः सुवस्तस्मै वै नमः ।
ॐ श्रीकृष्णाय गोविंदाय गोपीजनवल्लभाय
ॐ तत्सद्भूर्भुवः सुवस्तस्मै नमो नमः ।

भानुश्चन्द्रश्चोडुगणश्चैव हुताशो
यस्मिन्नैवाभाति तडिच्चापि कदापि ।
यद्भासा चाभाति समस्तं जगदेतत्
तं गोपालं संततकालं प्रति वंदे ॥

सजलजलदनीलं दर्शितोदारशीलम्
करतलधृतशैलं वेणुवाद्यं रसालम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

व्रजजनकुलपालं कामिनीकेलिलोलम्
तरुणतुलसिमालं नौमि गोपालबालम् ॥
सरोजनेत्राय कृपायुताय मंदारमालापरिभूषिताय ।
उदारहासाय लसन्मुखाय नमोऽस्तु गोपीजनवल्लभाय ॥
वन्देऽहं जगदाधारं निराधारं निरामयम् ।
निराकारं नराकारं नीराकारं निरञ्जनम् ॥
वंदे नवघनश्यामं पीतकौशेयवाससम् ।
सानंदं सुंदरं शुद्धं श्रीकृष्णं प्रकृतेः परम् ॥
वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥
मूकं करोति वाचालं पंगुं लंघयते गिरिम् ।
यत्कृपा तमहं वंदे परमानन्दमाधवम् ॥
वासुदेवं परं ब्रह्म सर्वभूताशयस्थितम् ।
आनन्दममलं शुद्धं मनोवाचामगोचरम् ॥
ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनः ।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः ॥
मया विष्णुर्हृदि ध्यातस्ततस्त्वं श्यामलो जातः ।
कृष्णो वै परमं दैवतं कृष्णो ब्रह्मैव शाश्वतम् ॥
जयतु जयतु देवो देवकीनन्दनोऽयम्
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जयतु जयतु मेघश्यामलः कोमलांगो
जयतु जयतु पृथ्वीभारनाशो मुकुंदः ॥
कुंचितैः कुंतलैर्भ्राजमानाननं रत्नमौलिं लसत्कुंडलं गंडयोः ।
हारकेयूरकं कंकणप्रोज्ज्वलं किंकिणीमंजुलं श्यामलं तं भजे ॥
मंदारमूले मदनाभिरामं बिंबाधरापूरितवेणुनादम् ।
गोगोपगोपीजनमध्यसंस्थं गोपं भजे गोकुलपूर्णचन्द्रम् ॥
मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्
गोपानां स्वजनः सतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः ।
मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनाम्
वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः ॥
लीलामात्रत्वान्न दूषकं नटवत् ।
अंगनामंगनामंतरे माधवो माधवं माधवं चांतरेणांगनाः ।
इत्थमाकल्पिते मंडले मध्यगः संजगौ वेणुना देवकीनंदनः ॥
कस्तूरीतिलकं ललाटपटले वक्षःस्थले कौस्तुभम्
नासाग्रे वरमौक्तिकं करतले वेणुं करे कंकणम् ।
सर्वांगे हरिचन्दनं सुललितं कण्ठे च मुक्तावलि-
र्गोपस्त्रीपरिवेष्टितो विजयते गोपालचूडामणिः ॥
गोविंदं गोकुलानन्दं वेणुवादनतत्परम् ।
राधिकारंजनं श्यामं वंदे गोपालनंदनम् ॥
हस्तमुत्क्षिप्य यातोऽसि बलात्कृष्ण किमद्भुतम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

हृदयाद्यदि निर्यासि पौरुषं गणयामि ते ॥
व्रजस्त्रीजनसंभूतः श्रुतिभ्यो ज्ञानसंगतः ।
प्रणवत्वेन प्रकृतित्वं वदन्ति ब्रह्मवादिनः ॥
ध्यानाभ्यासवशीकृतेन मनसा यन्निर्गुणं निष्क्रियम्
ज्योतिः किंचन योगिनो यदि परं पश्यंति पश्यंतु ते ।
अस्माकं तु तदेव लोचनचमत्काराय भूयाच्चिरम्
कालिंदीपुलिनेषु यत्किमपि तन्नीलं महो धावति ॥
वेणुनादविनोदाय गोपालायाहिमर्दिने ।
कालिंदीकूललोलाय लीलाकुण्डलधारिणे ॥
सत्पुण्डरीकनयनं मेघाभं वैद्युताम्बरम् ।
द्विभुजं ज्ञानमुद्राढ्यं वनमालिनमीश्वरम् ॥
शुद्धस्फटिकसंकाशं चन्द्रकोटिसमप्रभम् ।
श्रीवत्सकौस्तुभोरस्कं मुक्तामणिविभूषितम् ॥
अष्टपत्रं विकसितं हृत्पद्मं तत्र संस्थितम् ।
दिव्यध्वजातपत्रैस्तु चिह्नितं चरणद्वयम् ॥
श्रीवत्सलाञ्छनं हृत्स्थकौस्तुभप्रभया युतम् ।
चतुर्भुजं शङ्खचक्रशार्ङ्गपद्मगदान्वितम् ॥
सुकेयूरान्वितं बाहुं कण्ठमालासुशोभितम् ।
द्युमत्किरीटमभयं स्फुरन्मकरकुण्डलम् ॥
हिरण्मयं सौम्यतनुं स्वभक्तायाभयप्रदम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ध्यायेन्मनसि मां नित्यं वेणुशृङ्गधरं तु वा ॥
मथ्यते तु जगत्सर्वं ब्रह्मज्ञानेन येन वा ।
अहं ब्रह्मेति मां ध्यायन्नेकाग्रमनसा सकृत् ।
सर्वं तरति पाप्मानं कल्पकोटिशतैः कृतम् ॥
अतिपापप्रसक्तोपि ध्यायन्निमिषमच्युतम् ।
भूयस्तपस्वी भवति पंक्तिपावनपावनः ॥
मथुरामण्डले यस्तु जम्बुद्वीपे स्थितोऽपि वा ।
योऽर्चयेत्प्रतिमां मां च समे प्रियतरो भुवि ॥
शैली दारुमयी लौही लेप्या लेख्या च सैकती ।
मनोमयी मणिमयी प्रतिमाऽष्टविधा स्मृता ॥

ब्रह्मदृष्टिरुत्कर्षात् ।

ब्रह्महत्यादिकं पापं मनोवाक्कायसंभवम् ।
शीघ्रं नश्यति तत्सर्वं शालिग्रामशिलार्चनात् ॥
गौरतेजोविना यस्तु श्यामतेजः समर्चयेत् ।
जपेद्वा ध्यायते वापि स भवेत्पातकी शिवे ॥
सूर्योऽग्निर्ब्राह्मणो गावो वैष्णवः खं मरुज्जलम् ।
भूरात्मा सर्वभूतानि भद्र पूजापदानि मे ॥
आदरः परिचर्यायां सर्वाङ्गैरभिवन्दनम् ।
मद्भक्तपूजाभ्यधिका सर्वभूतेषु मन्मतिः ॥
अर्चादिषु यदा यत्र श्रद्धा मां तत्र चार्चयेत् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सर्वभूतेष्वात्मनि च सर्वात्माहमवस्थितः ॥
यावत्सर्वेषु भूतेषु मद्भावो नोपजायते ।
तावदेवमुपासीत वाङ्मनःकायवृत्तिभिः ॥
शिरो मत्पादयोः कृत्वा बाहुभ्यां च परस्परम् ।
प्रपन्नं पाहि मामीश भीतं मृत्युग्रहार्णवात् ॥
मामेकमेव शरणमात्मानं सर्वदेहिनाम् ।
याहि सर्वात्मभावेन मया स्याह्यकुतोभयः ॥
हरे मुकुंद गोविंद नारायण जनार्दन ।
पाहि मां कृष्ण गोपाल शरणागतवत्सल ॥
शंखचक्रगदापाणे द्वारकानिलयाच्युतम् ।
गोविंद पुण्डरीकाक्ष रक्ष मां शरणागतम् ॥
प्रह्लादो रक्षितो येन ध्रुवश्च निर्जने वने ।
स मां रक्षतु सर्वात्मा सर्वव्यापी जनार्दनः ॥
यस्य भगवान् स्वयमखिलजगद्गुरुर्नारायणो
द्वारि गदापाणिरवतिष्ठते ॥
विदितोसि भवान् साक्षात् पुरुषः प्रकृतेः परः ।
केवलानुभवानन्दस्वरूपः सर्वबुद्धिदृक् ॥
देवकीसुत गोविंद वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥
श्रीकृष्ण रुक्मिणीकान्त गोपीजनमनोहर ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संसारसागरे मग्नं मामुद्धर जगद्गुरो ॥
केशव क्लेशहरण नारायण जनार्दन ।
गोविन्द परमानन्द मां समुद्धर माधव ॥
गोविंद गोविंद हरे मुरारे गोविंद गोविंद रथांगपाणे ।
गोविंद गोविंद मुकुंद कृष्ण गोविंद गोविंद नमो नमस्ते ॥
नमस्ते वासुदेवाय नमः संकर्षणाय च ।
प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः ॥
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविंदाय नमो नमः ॥
नमः कमलनाभाय नमस्ते जलशायिने ।
नमस्ते केशवानन्त वासुदेव नमोऽस्तुते ॥
नमस्ते पुरुषाध्यक्ष नमस्ते भक्तवत्सल ।
नमस्तेऽस्तु हृषीकेश नारायण नमोस्तु ते ॥
नमः कमलनेत्राय नमः कमलमालिने ।
नमः कमलनाभाय कमलापतये नमः ॥
नमो विज्ञानरूपाय परमानन्दरूपिणे ।
कृष्णाय गोपिनाथाय गोविंदाय नमो नमः ॥
वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोस्तुते ॥
अतसीपुष्पसंकाशं पीतकौशयवाससम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ये नमस्यंति गोविंदं न तेषां विद्यते भयम् ॥
एकोऽपि कृष्णस्य कृतः प्रमाणो
दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय ॥
नमस्ये पुरुषं त्वाद्यमीश्वरं प्रकृतेः परम् ।
अलक्ष्यं सर्वभूतानामंतर्बहिरवस्थितम् ॥
ईश्वरो जीवकलया प्रविष्टो भगवानिति ।
प्रणमेद्दण्डवद्भूमावाश्वचाण्डालगोखरम् ॥
आब्रह्मस्तंबपर्यंतं परमात्मस्वरूपकम् ।
स्थावरं जंगमं चैव प्रणमामि जगन्मयम् ॥
खं वायुमग्निं सलिलं महीं च ज्योतींषि सत्त्वानि दिशो द्रुमादीन्
सरित्समुद्रांश्च हरेः शरीरं यत् किंच भूतं प्रणमेदनन्यः ॥
यस्मिन्सर्वे यतः सर्वे यः सर्वे सर्वतश्च यः ।
यश्च सर्वमयो देवस्तस्मै सर्वात्मने नमः ॥
आकाशात्पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥
दिवि वा भुवि वा ममास्तु वासो नरके वा नरकान्तक प्रकामम्
अवधीरितशारदारविंदौ चरणौ ते मरणेऽपि चिंतयामि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

संचिंतयेद्भगवतश्चरणारविंदम्
वज्रांकुशध्वजसरोरुहलांच्छनाढ्यम् ।
उत्तुंगरक्तविलसन्नखचक्रवाल-
ज्योत्स्नाभिराहतमहद्धृदयांधकारम् ॥

न नाकपृष्ठं न च सार्वभौमं न पारमेष्ठ्यं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति त्वत्पादरजःप्रपन्नाः ॥
स्वपादमूलं भजतः प्रियस्य युक्तान्यभावस्य हरिः परेशः ।
विकर्म यच्चोत्पतितं कथंचिद् धुनोति सर्वं हृदि सन्निविष्टः ॥

धर्मार्थकाममोक्षाख्यं य इच्छेत् श्रेय आत्मनः ।
एकमेव हरेस्तत्र कारणं पादसेवनम् ॥
अकालमृत्युहरणं सर्वव्याधिविनाशनम् ।
विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् ॥
पादोदकं च निर्माल्यं मस्तके धारयेत्सदा ।
विष्णोर्दृष्टं भक्षितव्यं तुलसीदलमिश्रितम् ॥
निवेद्य केशवे मालां तुलसीकाष्ठसंभवाम् ।
वहते यो नरो भक्त्या तस्य वै नास्ति पातकम् ॥
देव मे यत्र कुत्रापि स्थिताया अपि सर्वदा ।
त्वत्पादकमले सक्ता भक्तिरेव सदाऽस्तु मे ॥
सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमच्युत ।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न किंचित्साधवो धीरा भक्ता ह्येकान्तिनो मम ।
वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् ॥
शरीरं सरूपं तथा वा कलत्रं
यशश्चारुचित्रं धनं मेरुतुल्यम् ।
मनश्चेन्न लग्नं हरेरंघ्रिपद्मे
ततः किं ततः किं ततः किं ततः किम् ॥

अथ भक्तियोगबोधकश्रुतयः ।

यत्कीर्तनं यत्स्मरणं यदीक्षणं यद्वंदनं यच्छ्रवणं यदर्हणम् ।
लोकस्य सद्यो विधुनोति कल्मषं तस्मै सुभद्रश्रवसे नमो नमः ॥
कृतादिषु प्रजा राजन्कलाविच्छन्ति संभवम् ।
कलौ खलु भविष्यन्ति नारायणपरायणाः ॥
सत्यादित्रियुगे बोधवैराग्यौ मुक्तिसाधकौ ।
कलौ तु केवलं भक्तिर्ब्रह्मसायुज्यकारिणी ॥
कलिना सदृशः कोऽपि युगो नास्ति वरानने ।
तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने ॥
मुक्तिं दासीं ददौ तुभ्यम् ।
तदा नाहं हरेर्दासो लोके त्वां न प्रवर्तये ।
चतुर्मुखादीनां सर्वेषामपि विना विष्णुभक्त्या
कल्पकोटिभिर्मोक्षो न विद्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा ।
हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिकाः ॥
न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ॥
योगस्य तपसश्चैव न्यासस्य गतयोऽमलाः ।
महर्जनस्तपः सत्यं भक्तियोगश्च मद्गतिः ॥
मद्रूपमद्वयं ब्रह्म आदिमध्यांतवर्जितम् ।
स्वप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम् ॥
भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥
मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥
शमो मन्निष्ठताबुद्धिर्लाभो मद्भक्तिरुत्तमा ।
मद्भावः सर्वभूतेषु समदृक्पण्डितो मतः ॥
विद्यात्मनि भिदाबाधो ज्ञानं चैकात्म्यदर्शनम् ।
भक्त्याहमेकया ग्राह्यो ज्योतिर्ज्योतिषि संयुतम् ॥

भक्तिगम्यं परं तत्त्वम् ।

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम् ॥
वैराग्यतैलसंपूर्णे भक्तिवर्तिसमन्विते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रबोधपूर्णपात्रे तु ज्ञप्तिदीप्तं विलोकयेत् ॥
प्रवृत्तिर्द्विविधा प्रोक्ता मार्जारी चैव वानरी ।
ज्ञानाभ्यासवतामोतुर्वानरी भाक्त्वमेव च ॥
श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वंदनं दास्यं सख्यमात्मनिवेदनम् ॥

श्रवणभक्तिः ।

यदा सद्गुरुकटाक्षो भवति तदा
भगवत्कथाश्रवणध्यानादौ श्रद्धा जायते ।
शृण्वन्सुभद्राणि रथांगपाणे-
र्जन्मानि कर्माणि च यानि लोके ।
गीतानि नामानि तदर्थकानि
गायन्विलज्जो विचरेदसङ्गः ॥

यथा यथात्मा परिमृज्यतेऽसौ मत्पुण्यगाथाश्रवणाभिधानैः ।
तथा तथा पश्यति वस्तु सूक्ष्मं चक्षुर्यथैवाञ्जनसंप्रयुक्तम् ॥
तत्रैव गंगा यमुना च वेणी गोदावरी सिंधु सरस्वती च ।
सर्वाणि तीर्थानि वसंति तत्र यत्राच्युतोदारकथाप्रसंगः ॥

श्रवणं कीर्तनं ध्यानं हरेरद्भुतकर्मणः ।
जन्मकर्मगुणानां च तदर्थेऽखिलचेष्टितम् ॥
मत्कथाश्रवणे श्रद्धा मदनुध्यानमुद्धव ।
सर्वलाभोपहरणं दास्येनात्मनिवेदनम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तावत्कर्माणि कुर्वीत न निर्विद्येत यावता ।
मत्कथाश्रवणादौ वा श्रद्धा यावन्न जायते ॥

कीर्तनभक्तिः ।

कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः ।
कीर्तनादेव कृष्णस्य मुक्तसंगः परं व्रजेत् ॥
कृते यत् ध्यायतो विष्णुं त्रेतायां यजतो मखैः ।
द्वापरे परिचर्यायां कलौ तद्धरिकीर्तनात् ॥
सततं कीर्तयन्तो मां यतंतश्च दृढव्रताः ।
नमस्यंतश्च मां भक्त्या नित्ययुक्ता उपासते ॥
गोविंदेति सदा स्नानं गोविंदेति सदा जपः ।
गोविंदेति सदा ध्यानं सदा गोविंदकीर्तनम् ॥
दुर्लभा वैष्णवी भक्तिर्दुर्लभं तुलसीदलम् ।
दुर्लभं जाह्नवीतोयं दुर्लभं हरिकीर्तनम् ॥
नाहं वसामि वैकुंठे योगिनां हृदये रवौ ।
मद्भक्ता यत्र गायंति तत्र तिष्ठामि नारद ॥
यत्फलं नास्ति तपसा न योगेन समाधिना ।
तत्फलं लभते सम्यक्कलौ केशवकीर्तनात् ॥

स्मरणभक्तिः ।

करारविंदेन पदारविंदं मुखारविंदे विनिवेशयंतम् ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुंदं मनसा स्मरामि ॥
मनसा कर्मणा वाचा ये स्मरंति जनार्दनम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तत्र तत्र कुरुक्षेत्रं प्रयागो नैमिषं वनम् ॥
अच्युतानंतगोविंदनामोच्चारणभेषजात् ।
नश्यंति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥
विश्वरूपं हृषीकेशं गोविंदं मधुसूदनम् ।
सहस्राक्षं चतुर्बाहुं मुरारिं गरुडध्वजम् ॥
गोविन्द केशव मुकुन्द हरे मुरारे
लक्ष्मीनिवास मधुसूदन कृष्ण विष्णो ।
श्रीरामचन्द्र पुरुषोत्तम वासुदेव
नारायणाच्युत जनार्दन हंस सत्य ॥
हंसः सुपर्णो वैकुण्ठो धर्मो योगेऽश्वरोऽमलः ।
ईश्वरः पुरुषोऽव्यक्तः परमात्मेति गीयते ॥
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च ॥
पवित्राणां पवित्रं यो मंगलानां च मंगलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥
ॐ अपवित्रः पवित्रो वा सर्वावस्थांगतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यंतरः शुचिः ॥
रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि ।
इति रामपदेनासौ परं ब्रह्माभिधीयते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आद्यो रा तत्पदार्थः स्यान्मकारस्त्वंपदार्थवान् ।
तयोः संयोजनमसीत्यर्थे तत्त्वविदो विदुः ॥
हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ॥
कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः ।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥
कृष्णेति मंगलं नाम यस्य वाचि प्रवर्तते ।
भस्मीभवंति तस्याशु महापातककोटयः ॥
हरेर्नामैव नामैव नामैव मम जीवनम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥
हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ।
अनिच्छयापि संस्पृष्टो दहत्येव हि पावकः ॥
अकामः सर्वकामो वा मोक्षकाम उदारधीः ।
तीव्रेण भक्तियोगेन भजते पुरुषं परम् ॥
विष्ण्वाद्युत्तमदेहेषु प्रविष्टो देवता भवेत् ।
मर्त्याद्यधमदेहेषु स्थितो भजति मर्त्यताम् ॥
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।
ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहम् ॥
यदा भजति मां भक्त्या निरपेक्षः स्वकर्मभिः ।
तं सत्वप्रकृतिं विद्यात्पुरुषं स्त्रियमेव च ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

शतं विहाय भोक्तव्यं सहस्रं स्नानमाचरेत् ।
लक्षं विहाय दातव्यं कोटिं त्यक्त्वा हरिं भजेत् ॥
यदि भजसि हरिमपि केवलं हृदि कर्मणा वचसा ।
योगेन किं यज्ञेन किं ह्यपरेण किं तपसा ॥
पतितः स्खलितश्चार्तःक्षित्यां वा विवशो ब्रुवन् ।
हरये नम इत्युच्चैर्मुच्यते सर्वपातकात् ॥
मुहूर्तेन ब्रह्मलोकं खट्वाङ्गः समसाधयत् ।
गोकोटिदानं ग्रहणेषु काशीप्रयागगंगाऽयुतकल्पवासः ।
यज्ञायुतं मेरुसुवर्णदानम् गोविंदनाम्ना न कदापि तुल्यम् ॥
यज्ञानां जपयज्ञोऽस्मि ।
अनन्याश्चिन्तयंतो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ॥
भोजनाच्छादने चिंतां वृथा कुर्वन्ति वैष्णवाः ।
योऽसौ विश्वंभरो देवः स भक्तान् किमुपेक्षते ॥
तावद्भवति मे दुःखं चिंता संसारसागरे ।
यावत्कमलपत्राक्षं न स्मरामि जनार्दनम् ॥
अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥
विषयान्ध्यायतश्चित्तं विषयेषु विषज्यते ।
मामनुस्मरतश्चित्तं मय्येव प्रविलीयते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ॥
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।
यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरम् ।
तं तमेव समाप्नोति नान्यथा श्रुतिशासनम् ॥

पादसेवनभक्तिः ।

धर्मार्थकाममोक्षाख्यं य इच्छेत् श्रेय आत्मनः ।
एकमेव हरेस्तत्र कारणं पादसेवनम् ॥
भगवत उरुविक्रमाङ्घ्रिशाखानखमणिचंद्रिकया निरस्ततापे ।
हृदि कथमुपसीदतां पुनः स प्रभवति चन्द्र इवोदितेऽर्कतापः ॥
यर्ह्यब्जनाभचरणैषणयोरुभक्त्या
चेतोमलानि विधमेद्गुणकर्मजानि ।
तस्मिन्विशुद्ध उपलभ्यत आत्मतत्त्वं
साक्षाद्यथामलदृशोः सवितृप्रकाशः ॥
तदेव लग्नं सुदिनं तदेव, तारावलं चंद्रबलं तदेव,
विद्याबलं दैवबलं तदेव, लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि

अर्चनभक्तिः ।

द्विधार्चनं व्यक्ताव्यक्तभेदात् ।
बहिरंतस्तदर्चनम् ।
वासुदेवः संकर्षणः प्रद्युम्नः पुरुषः स्वयम् ।
अनिरुद्ध इति ब्रह्मन् मूर्तिव्यूहोऽभिधीयते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वे रूपे वासुदेवस्य चलं चाचलमेव च ।
चलं संन्यासिनो रूपमचलं प्रतिमादिकम् ॥
प्रतिष्ठया सार्वभौमं सद्मना भुवनत्रयम् ।
पूजादिना ब्रह्मलोकं त्रिभिर्मत्साम्यतामियात् ॥
पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ।
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥

वंदनभक्तिः ।

कृष्णाय वासुदेवाय देवकीनंदनाय च ।
नंदगोपकुमाराय गोविंदाय नमोनमः ॥
एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ।
दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ॥

दास्यभक्तिः ।

वासुदेवं परित्यज्य योऽन्यं देवमुपासते ।
तृषितो जाह्नवी तीरे कूपं खनति दुर्मतिः ॥
वासुदेवस्य ये भक्ताः शांतास्तद्गतमानसाः ।
तेषां दासस्य दासः स्यामहं जन्मनि जन्मनि ॥
न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।

सख्यभक्तिः ।

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
नारायणं नरसखं शरणं प्रपद्ये ।
पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुम् ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

आत्मनिवेदनभक्तिः ।

इष्टं दत्तं तपो जप्तं वृत्तं यच्चात्मनः प्रियम् ।
दारान्सुतान्गृहान्प्राणान्यत्परस्मै निवेदनम् ॥
अभिमन्युसुतो मुक्तिं गतः श्रवणतो हरेः ।
शुकस्तु कीर्तनादेव प्रह्लादः स्मरणेन च ॥
पादसेवनतो लक्ष्मीः पृथुः पूजनमात्रतः ।
अभिवंदनतोऽक्रूरो दास्येनांजनिकासुतः ॥
सख्यत्वेनार्जुनो राजा बलिस्त्वात्मनिवेदनात् ॥
गोप्यः कामाद् भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
संबन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ॥
व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेंद्रस्य का
कुब्जायाः कमनीयरूपमधिकं किं वा सुदाम्नो धनम् ।
वंशः को विदुरस्य यादवपतेरुग्रस्य किं पौरुषम्
भक्त्या तुष्यति केवलं न च गुणैर्भक्तिप्रियो माधवः ।
स्वकर्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहम् ।
तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढाऽस्तु मे ॥
यदि गमनमधस्तात्कालपाशानुबद्धो
यदि च कुलविहीने जायते पक्षिकीटे ।
कृमिशतमपि गत्वा जायते चांतरात्मा
मम भवतु हृदिस्थे केशवे भक्तिरेका ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

सकलभुवनमध्ये निर्धनास्तेऽपि धन्या
निवसति हृदि येषां श्रीहरेर्भक्तिरेका ।
हरिरपि निजलोकं सर्वथातो विहाय
प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः ॥
बंधनानि खलु संति बहूनि प्रेमरज्जुकृतबंधनमन्यत् ।
दारुभेदनिपुणोऽपि षडंघ्रिर्निष्क्रियो भवति पंकजकोशे ॥

प्रेमलक्षणा भक्तिः ।

हृत्पुण्डरीकमध्ये तु भावयेत्परमेश्वरम् ।
साक्षिणं बुद्धिवृत्तस्य परमप्रेमगोचरम् ॥
क्वचिद्रुदन्त्यच्युतचिन्तया क्वचिद्
हसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजम्
भवन्ति तूष्णीं परमेत्य निर्वृताः ॥
द्रवीभूतस्य रोमोद्गमादि लिंगम् ।
वाग्गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति ॥
केवलमविच्छिन्नानुरागं लभते ।
स तरति स तरति स लोकांस्तारयति ॥
माया परैत्यभिमुखे च विलज्जमाना ।
जन्मान्तरसहस्रेण तपोध्यानसमाधिभिः ।
नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

पराभक्तिः ।

अलं व्रतैरलं तीर्थैरलं योगैरलं मखैः ।
अलं ज्ञानकथालापैर्भक्तिरेकैव मुक्तिदा ॥
मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी ।
स्वस्वरूपानुसंधानं भक्तिरित्यभिधीयते ॥
ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥
सर्वभूतेषु यः पश्येद्भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः ॥
यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥

ज्ञानी त्वात्मैव मे मतम् ।

मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ॥
मद्व्यतिरिक्तमणुमात्रं न विद्यते ।
अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

परस्परमीश्वरानुसंधानम् ।

मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम् ।
कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥
तेषामेवानुकम्पार्थमहमज्ञानजं तमः ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥
सन्तोऽनपेक्षा मच्चित्ताः प्रशान्ताः समदर्शनाः ।
निर्ममा निरहंकारा निर्द्वन्द्वा निष्परिग्रहाः ॥
तितिक्षुर्द्वंद्वमात्राणां सुशीलः संयतेन्द्रियः ।
शान्तः समाहितधिया ज्ञानविज्ञानसंयुतः ॥
विविक्तक्षेमशरणो मद्भावविमलाशयः ।
आत्मानं चिन्तयेदेकमभेदेन मया मुनिः ॥
मच्चिन्तनं मत्कथनमन्योन्यं मत्प्रभाषणम् ।
मदेकपरमो भूत्वा कालं नय महामते ॥
ज्ञानं विशुद्धं परमार्थमेकमनन्तरं त्वं बहिर्ब्रह्मसत्यम् ।
प्रत्यक्प्रशांतं भगवच्छब्दसंज्ञं यद्वासुदेवं कवयो वदन्ति ॥
विशुद्धं केवलं ज्ञानं प्रत्यक्सम्यगवस्थितम् ।
सत्यं पूर्णमनाद्यन्तं निर्गुणं नित्यमद्वयम् ॥
न कामकर्मबीजानां यस्य चेतसि संभवः ।
वासुदेवैकनिलयः स वै भागवतोत्तमः ।
निर्गुणे ब्रह्मणि मयि धारयन्विशदं मनः ।
परमानन्दमाप्नोति यत्र कामोऽवसीयते ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अकिंचनस्य दान्तस्य शान्तस्य समचेतसः ।
मया संतुष्टमनसः सर्वाः सुखमया दिशः ॥
भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि मयि दृष्टेऽखिलात्मनि ॥
आत्मानं सर्वभूतेषु भगवंतमवस्थितम् ।
अपश्यत्सर्वभूतानि भगवत्यपि चात्मनि ॥
सर्वभूतसुहृच्छान्तो ज्ञानविज्ञाननिश्चयः ।
पश्यन्मदात्मकं विश्वं न विपद्येत वै पुनः ॥
अहमात्मान्तरो बाह्योऽनावृतः सर्वदेहिनाम् ।
यथा भूतानि भूतेषु बहिरन्तः स्वयं तथा ॥
मामेव सर्वभूतेषु बहिरन्तरपावृतम् ।
ईक्षेतात्मनि चात्मानं यथा खमलाशयः ॥
ब्राह्मणे पुल्कसे स्तेने ब्रह्मण्येऽर्के स्फुलिङ्गके ।
अक्रूरे क्रूरके चैव समदृक्पंडितो मतः ॥
विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥
ज्ञाननिष्ठो विरक्तो वा मद्भक्तो वानपेक्षकः ।
सलिङ्गानाश्रमांस्त्यक्त्वा चरेदविधिगोचरः ॥
वासे बहूनां कलहो भवेद्वार्ता द्वयोरपि ।
एक एव चरेत्तस्मात्कुमार्या इव कंकणः ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकश्चरेन्महीमेतां निःसङ्गः संयतेन्द्रियः ।
आत्मक्रीड आत्मरत आत्मवान्समदर्शनः ॥
निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ।
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः ॥
न तथा मे प्रियतम आत्मयोनिर्न शंकरः ।
न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान् ॥
संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥
मत्कर्मकृन्मत्परमो मद्भक्तः संगवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥
मयेश्वरेण जीवेन गुणेन गुणिना विना ।
यच्चापि सर्वभूतानां बीजं तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूतं चराचरम् ॥

यः सर्वज्ञः सर्ववित् ।

वेदाहं समतीतानि वर्तमानानि चार्जुन ।
भविष्याणि च भूतानि मां तु वेद न कश्चन ॥
न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥
नाहं प्रकाशः सर्वस्य योगमायासमावृतः ।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ॥
निर्गुणोऽपि ह्यजोऽव्यक्तो भगवान् प्रकृतेः परः ।
स्वमायागुणमाविश्य बाध्यबाधकतां गतः ॥
बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ।
गुणस्य मायामूलत्वान्न मे मोक्षो न बंधनम् ॥
एकस्यैव ममांशस्य जीवस्यैव महामते ।
बंधोऽस्याऽविद्ययानादिर्विद्यया च तथेतरः ॥
जीवस्तु गुणसंयुक्तो भुङ्क्ते कर्मफलान्यसौ ।
संपद्यते गुणैर्मुक्तो जीवो जीवं विहाय माम् ॥
घटे भिन्ने यथाकाश आकाशः स्याद्यथा पुरा ।
एवं देहे मृते जीवो ब्रह्म संपद्यते पुनः ॥
गुणेषु चाविशच्चित्तमभीक्ष्णं गुणसेवया ।
गुणाश्च चित्तप्रभवा मद्रूप उभयं त्यजेत् ॥
न तथा बध्यते विद्वांस्तत्र तत्रादयन्गुणान् ।
प्रकृतिस्थोऽप्यसंसक्तो यथा खं सवितानिलः ।
गुणदोषदृशिर्दोषो गुणस्तूभयवर्जितः ॥
कोशोपाधिविवक्षायां याति ब्रह्मैव जीवताम् ।
पितापितामहश्चैकः पुत्रपौत्रौ यथा प्रति ॥
पठन्तु शास्त्राणि भजन्तु देवान् कुर्वन्तु कर्माणि यजन्तु यज्ञैः ।
आत्मैकबोधेन विनापि मुक्तिर्न सिद्ध्यति ब्रह्मशतान्तरेऽपि ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

मुक्तिस्तु ब्रह्मतत्त्वस्य ज्ञानादेव न चान्यथा ।
स्वप्नबोधं विना नैव स्वस्वप्नो हीयते यथा ॥
अद्वितीयब्रह्मतत्त्वे स्वप्नोऽयमखिलं जगत् ।
ईशजीवादिरूपेण चेतनाचेतनात्मकम् ॥
निरुपाधिब्रह्मतत्त्वे भासमाने स्वयंप्रभे ।
अद्वैते त्रिपुटी नास्ति भूमानन्दोऽत उच्यते ॥
यस्तु साक्षिणमात्मानं सेवते प्रियमुत्तमम् ।
तस्य प्रेयानसावात्मा न नश्यति कदाचन ॥
मा न भूवं हि भूयासमिति प्रेमात्मनीक्ष्यते ।
तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि ॥
सत्त्ववृत्तौ चित्सुखैक्यं तद्वृत्तेर्निर्मलत्वतः ।
रजोवृत्तेस्तु मालिन्यात्सुखांशोऽत्र तिरस्कृतः ॥
सुखमस्वाप्समत्राहं न वै किंचिदवेदिषम् ।
यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव ।
येन भूतान्यशेषेण द्रक्ष्यंस्यात्मन्यथो मयि ॥
यावानर्थ उदपाने सर्वतः संप्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥
कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ॥
यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः ॥
त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः ॥
कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥
वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥
वैराग्योपरती पूर्णे बोधस्तु प्रतिबध्यते ।
यस्य तस्य न मोक्षोऽस्ति पुण्यलोकस्तपोबलात् ॥
पूर्णबोधे तदन्यौ द्वौ प्रतिबद्धौ यदा तदा ।
मोक्षो विनिश्चितः किंतु दृष्टदुःखं न नश्यति ॥
स्वस्वकर्मानुसारेण वर्ततां ते यथा तथा ।
अवशिष्टः सर्वबोधः समा मुक्तिरिति स्थितिः ॥
नीरोग उपविष्टो वा रुग्णो वा विलुठन् भुवि ।
मूर्च्छितो वा त्यजत्वेष प्राणान् भ्रांतिर्न सर्वथा ॥
प्रमाणोत्पादिता विद्या प्रमाणं प्रबलं विना ।
न नश्यति न वेदांतात्प्रबलं मानमीक्षते ॥
सात्त्विक्याध्यात्मिकी श्रद्धा कर्मश्रद्धा तु राजसी ।
तामस्यधर्मे या श्रद्धा मत्सेवायां तु निर्गुणा ॥
वनं तु सात्त्विको वासो ग्रामो राजस उच्यते ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

तामसं द्यूतसदनं मन्निकेतं तु निर्गुणम् ॥
सत्वे प्रलीनाः स्वर्यांति नरलोकं रजोलयाः ।
तमोलयास्तु निरयं यांति मामेव निर्गुणाः ॥

श्रीगुरुमहिमा ।

आत्मनो गुरुरात्मैव ।
मदभिज्ञं गुरुं शांतमुपासीत मदात्मकम् ।
तावत् परिचरेद् भक्तः श्रद्धावाननसूयकः ।
यावद्ब्रह्म विजानीयान्मामेव गुरुमादृतः ॥
यावदायुस्त्रयो वंद्या वेदान्तो गुरुरीश्वरः ।
आदौ ज्ञानप्रसिद्ध्यर्थं कृतघ्नत्वापनुत्तये ॥
गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो सदाच्युतः ।
न गुरोरधिकः कश्चित्त्रिषु लोकेषु विद्यते ॥
गुरुरेव परं ब्रह्म गुरुरेव परा गतिः ।
गुरुरेव परा विद्या गुरुरेव परायणः ॥
गुशब्दस्त्वन्धकारःस्याद्रुशब्दस्तन्निरोधकः ।
अंधकारनिरोधित्वाद्गुरुरित्यभिधीयते ॥
यत्कृपालवमात्रेण मूढस्त्यजति मूढताम् ।
प्रणम्य सद्गुरुं श्रेष्ठमज्ञानध्वांतभास्करम् ॥
दिव्यज्ञानोपदेष्टारं देशिकं परमेश्वरम् ।
पूजयेत्परया भक्त्या तस्य ज्ञानफलं भवेत् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

समत्वेन च मर्त्यलोके ।
यः प्राप्य मानुषं लोकं मुक्तिद्वारमपावृतम् ।
गृहेषु खगवत्सक्तस्तमारूढच्युतं विदुः ॥

साधुमहिमा ।

दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ।
तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ॥
साधूनां दर्शनं लोके सर्वसिद्धिकरं परम् ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।
वैकुंठसाधकः पन्था स तु गोप्यो हि वर्तते ।
तस्योपदेष्टा पुरुषः प्रायो भाग्येन लभ्यते ॥

साधवो दीनवत्सलाः ।

साधूनां दर्शनं पुण्यं तीर्थभूता हि साधवः ।
कालेन फलते तीर्थं सद्यः साधुसमागमः ॥

सतां संगतिश्च श्रेयस्करत्वात् ।

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो नहि सर्वत्र चन्दनं न वने वने ॥
भाग्योदयेन बहुजन्मसमार्जितेन सत्संगमं च लभते पुरुषो यदा वै ।
अज्ञानहेतुकृतमोहमदांधकारनाशं विधाय हि तदोदयते विवेकः ॥
जाड्यं धियो हरति सिञ्चति वाचि सत्यम्
मनोन्नतिं दिशति पापमपाकरोति ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

चित्तं प्रसादयति दिक्षु तनोति कीर्तिम्
सत्संगतिः कथय किं न करोति पुंसाम् ॥
सत्सङ्गेन परं प्राप्य दुस्तरं तरतेऽचिरात् ।
तस्मादतिप्रयत्नेन सत्संगं सततं कुरु ॥
उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे शिलायाम्
न भवति पुनरुक्तं भाषितं सज्जनानाम् ॥
मामेकं शरणं व्रज मद्भक्तिनिष्ठो भव ।
मदीयोपासनां कुरु मामेव प्राप्स्यसि ।
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥
सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।
नारायणं नमस्तेऽस्तु शंखचक्रगदाधर ।
दामोदरारविंदाक्ष गोविंद यदुनंदन ॥
नमस्ते वासुदेवाय नमः संकर्षणाय च ।
प्रद्युम्नायानिरुद्धाय तुभ्यं भगवते नमः ॥
वसुदेवसुतः श्रीमान्वासुदेवो जगत्पतिः ।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

जहार वसुधाभारं तस्मै कृष्णात्मने नमः ॥
नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ।
स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥
रामः समुद्रवेलायां योगमास्थाय पौरुषम् ।
तत्याज लोकं मानुष्यं संयोज्यात्मानमात्मनि ॥
लोकाभिरामां स्वतनुं धारणाध्यानमंगलम् ।
योगधारणयाग्नेय्या दग्ध्वा धामाविशत्स्वकम् ॥
द्वारकां हरिणा त्यक्तां समुद्रोऽप्लावयत्क्षणात् ।
वर्जयित्वा महाराज श्रीमद्भगवदालयम् ॥
शंभलग्राममुख्यस्य ब्राह्मणस्य महात्मनः ।
भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति ॥
हनिष्यति कलेरन्ते म्लेच्छांस्तुरगवाहनः ।
धर्मसंस्थापनार्थाय तस्मै कल्क्यात्मने नमः ॥
यस्य हस्ते गदा चक्रं गरुडो यस्य वाहनम् ।
शंखः करतले यस्य स मे विष्णुः प्रसीदतु ॥
यः प्रभुः सर्वलोकानां येन सर्वमिदं ततम् ।
चराचरगुरुर्देवः स मे विष्णुः प्रसीदतु ॥
तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

एकांतेन जगत्कृत्स्नमवष्टभ्य स्थितः प्रभुः ।
अग्राह्यो निर्गुणो नित्यस्तमस्मि शरणं गतः ॥
शतेषु जायते शूरः सहस्रेषु च पण्डितः ।
वक्ता दशसहस्रेषु योजकस्तत्र दुर्लभः ॥
क्षीयंते खलु भूषणानि सततं वाग्भूषणं भूषणम् ।
अनन्तशास्त्रं बहुलाश्च विद्या अल्पश्च कालो बहवश्च विघ्नाः ।
यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्यात् ॥
यं शैवाः समुपासते शिव इति ब्रह्मेति वेदांतिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं वो विदधातु वांच्छितफलं त्रैलोक्यनाथो हरिः ॥
श्रीरामा पुरुषोत्तमा नरहरे नारायणा केशवा ।
गोविंदा गरुडध्वजा गुणनिधे दामोदरा माधवा ॥
श्रीकृष्णा कमलापते यदुपते सीतापते श्रीपते ।
वैकुण्ठाधिपते चराचरपते लक्ष्मीपते पाहि माम् ॥
आलोड्य सर्वशास्त्राणि विचार्यैव पुनः पुनः ।
इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥

॥ श्रीकृष्णार्पणमस्तु ॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

॥ ॐ श्रीगुरवे शरण नमः

मो लौकिक नाथो विजयेतेत राम

प्रयद्वारिका पुरियां शारदा

मठोत्र शारदामठ उच्यते कीटव

संगम प्रदाय तस्य तीर्थ ग्रामे शु

रिका रुद्र क्षेत्रं ॥ स्यात देवी

प्रभाली देवी स्याद्व्यापिरयो

मामली तीर्थ मम लेब्रह्मचारी सक

याय वेद वक्ता चतन धर्मेव समाच

बात्मा धर्मोत्मक्य बोध्यो वन धर्मि

मुसीहि महा वाक्य गोत्रो प्रावगत

साधु सौवीर सौमद्रा महा रुद्र तथ

राम पश्चिमदिक स्याद शारदा म

वेणी संगमे तीर्थे तु मस्त्वा

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

[illegible] ग्रहने प्रोढ़ [illegible] ॥

[illegible] विनिर्मुक्तावस्थ्रमाणमुच्यते ।

[illegible] विशेषेणाणिमेते जीवजन्तवः ॥

[illegible] वा नित्यं कोटवारस्उच्यते ।

[illegible] विजानन्तीसोधर्मे [illegible] ॥

[illegible] क्रीड़ितंनित्यं [illegible] वड़ उच्यते ॥

॥ ॥ इति श्री शारदानन्दामाय [illegible]

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri